*. The text dealing with *Caulakarma* is given on p.500, line 9-16 in M and p.983, line 3-12 in Ad. १. M Ad भव°...प्रथम. २. M Ad wrongly show the sign of the end of the section as :'' —. ३. See *Vṛtti* on 1.3.1. ४. M Ad om चौळादि°. ५. M Ad °दरणी...त°.

अथ प्रथमाध्याये दशमः खण्डः

अथाभ्युदयिकश्राद्धम्*

तस्मिन् पूर्वेद्युः कर्मेति॥ १॥

वृत्तिः—पूर्वेकरणम्। विवाहोपनयनयोरिच्छन्त्याभ्युदयिकमिति प्रसिद्धेः। गोदाने त्वतिदेशादेव प्राप्नोति॥

आमात्यं परिस्तीर्य दारुमिध्ममभ्याधायेति॥ २॥

वृत्तिः—अस्याग्नेरदृष्टार्थत्वात्॥

अथोत्तरतः प्राचो [1]दर्भा[अ]तिदिश्यन्ते॥ ३॥

[2](अति)देशेन स्थण्डिलस्य प्रत्याम्नायं कल्पनस्य वेति[3] केचित्॥ ४॥

वृत्तिः—तथा सति बलिहरणमेव कर्तव्यमग्न्यादिभिर्ब्रह्मादीनां प्रत्याम्नायः। प्राङ्मुखमेवैतेषु तद्धयतिदेष्टुं युक्तम्॥

प्राथम्यात् व्रीहियवान् व्याहरेदिति॥ ५॥

वृत्तिः—[4][व्रीहियव]योर्गुणविधिः॥

युग्मान् [5](ब्राह्मणान् परि)विष्येति॥ ६॥

नान्दीमुखान् पितॄन् संकल्प्य परिवेषणं दैववत्॥ ७॥

आचान्तेषु उदकुंभमद्भिर्वाचयेत्॥ ८॥

तेऽपि 'समाहितमनसः स्मः', 'प्रसन्नाः स्मः' **इति ब्रुवते॥ ९॥**

सप्रणवं नान्दीश्राद्धं ददातीत्यादिगतास्[6]तुल्यदेवता होमाः कर्तव्या इति॥ १०॥

---

*. The text dealing with *Ābhyudayika-śrāddha* is given on p.500, line 15 to p. 501, line 12 in M and p.983, line 12 to p.985, line 5 in Ad. १. M Ad दर्भ...तिदि°. २. M Ad om. ३. M Ad वीति. ४. M Ad °दिति...योः. ५. M Ad om. ६. M Ad गता...तुल्य.

वृत्तिः–होमबहुत्वं च [१]देव[बहुत्वा]देवावसीयते[१]। तत्र पौर्णमास्यामग्निः, सोमः, अग्नीषोमौ (च)[२]। अमावास्यायामग्निर्विष्णुरिन्द्राग्नी च। इन्द्रमहेन्द्रयोरत्राभावः। न राज्ञां[३] विषयत्वात्। अमुष्मै[४]...कृतिस्तद्वद्दर्शनात्। ताभ्यां होमपक्षे दार्शपौर्णमासिक्यास्तर्ह्यृचो[५] ग्रहीतव्याः।

॥ उपांशुयाजस्य प्राजापत्यत्वे दर्शपूर्णमासयोरनारंभता॥ ११॥

वृत्ति–यद्देवत्य उपांशुयाजस्तद्देवत्ये ग्रहीतव्ये यद्युद्वातस्यां जुहोति[६]।

इति प्रथमाध्याये दशमः खण्डः

समाप्तश्च प्रथमोऽध्यायः

—o—

१-१. M Ad देव...देवा वसयते. २. M Ad om. ३. M Ad राजान वि°. ४. M Ad °ष्मै...कृति. ५. M °क्यात्घृचो, Ad °क्यातह्यृ°. ६. Due to displacement of folio M Ad wrongly give the text: अथ यद्देवत्य = पुष्पशब्देनार्तवमुच्येत dealing with the *Ṛtusaṁveśanam,* here. It has been shifted to its proper place on p.1 (see fn *-* on p.1).

अथ द्वितीयाध्याये प्रथमः खण्डः

[1]अथ उपनयनकर्म

अष्टम उपनयनाख्यं कर्मारभ्यते॥ १॥

तस्य गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनयनम्॥ २॥

वृत्तिः—'वसन्ते ब्राह्मणमुपनयीत[2]' इत्यादि कालविधानं वर्णव्यवस्थायाः [3]प्राप्तमनुजानाति, सर्वकर्मणां स्मृतिशास्त्रापेक्षत्वात्। यज्ञोपवीतवाससो [4]मेखलाजिनदण्डानां तत एवागमनं तथा च तथाऽऽचारप्राप्तम्॥

पूर्वेद्युः पुण्याहवाचनभोजनकेशवपनादि॥ ३॥

वृत्तिः—ब्रह्मचारिणं ब्रह्मचारिभाविनं भाविनिलोकभूतवदुपचरन्ति। तद्यथा- ओदनं पचति, शकटं वयतीति। तथा वेदेऽपि यूपमच्छैतीति॥

[5]ब्रह्मचारिणमुपनयिष्यमाणो भवति॥ ४॥

वृत्तिः—उपनयिष्यमाण उपनयेन संस्कर्तुकामः॥

---

१. The text dealing with the *Upanayana*- rite, is found in M, Ad and also in the M^1 H^1 and H^2, under which the first 28 pages in M^1 H^2 and 55 pages in H^1 belong to the *Gṛhya*-rites. It may be pointed out that in M^1 H^1 and H^2 the text comprises of the *sūtras* only, not the *Vṛtti*. Due to displacement of folios the order of rites including its parts have been badly affected. The *Upanayana* is described on p.6, line 10 to p.10, line 4 in M^1; p.10, line 5 to p.18, line 12 in H^1 and p.5, line 2 to p.8, line 3 in H^2. However, the first three *sūtras* are not found in them. The *Vṛtti* on first 12 *sūtras* is found from p.551, line 12 in M and from p.1070, line 1 in Ad up to the end of the said MSS. २. M Ad °पनीतेत्या°. ३. M °स्थायाप्रप्त°, Ad °स्थाया प्रा°. ४. M मेखाला°. ५. M^1 H^1 and H^2 begin the text of उपनयन with this *sūtra*, and give onward the *sūtras* only. M Ad give this *sūtra* before 'ब्रह्मचारिणं ब्रह्मचारिभाविनं = यूपमच्छैतीति', but its *Vṛtti* after यूपमच्छैतीति.

स यज्ञोपवीतं कृत्वाऽप आचम्य द्वाभ्यामात्मन्नग्निं गृह्णीते–'मयि गृह्णाम्यग्रे अग्निम्', 'यो नो अग्निः पितरो हृत्स्वन्तर्' **इति**॥ ५॥

वृत्तिः–यज्ञोपवीतमित्यादिगतार्थः॥

अथाप आचामति–'उप मा यन्तु मरुतः[1] सनीडा[2] उप मा [जक्षुरुप मा मनीषा'][2] **इत्याह**॥ ६॥

वृत्तिः–अथवाऽऽचार्य एष्टार्थमाचमनम्। शौचार्थस्य गतत्वात्॥

[3]शुचौ समदेशे अग्निमुपसमाधाय[3]॥ ७॥

वृत्तिः–श्रोत्रियागारादुदाहृतो निर्मथितो वा। कुत एतत्। उत्तरत्रोऽपरेणाग्निमित्यग्नेरनूद्यमानत्वात् कृतसंस्कारेण च पदार्थानां कर्तव्यत्वात् परिसमूहनपर्युक्ष[4]णपरिस्तरणान्याचारप्राप्तानि करोति॥

[5]ततः प्रयोजनवन्ति साधनानि यज्ञोपवीतवास आदीनि दर्भेषु सहैव संसाद्य तूष्णीं संस्कृतार्थं प्रोक्षति॥ ८॥

ततः कुमारं यज्ञोपवीतवाससा मेखलाजिनदण्डान् क्रमेण ग्राहयति[5]॥ ९॥

तेषां मन्त्रवर्यैरा[6]म्नातान् मन्त्रान्[7] गृह्णन्ति केचित्॥ १०॥

वृत्तिः–द्रव्याणामपि ग्रहणस्येहानाम्नातात्[8] तेषामवश्योपादेयत्वात् तद्गुणानां मन्त्राणां ग्रहणे नास्ति दोषः॥

[9]कुमारः समित्पाणिः 'ब्रह्मचर्यमगाम्' **इति वदति[9]**॥ ११॥

[10]ततः 'को नामासि' [**इत्येनमाह**][11]॥ १२॥

वृत्तिः–['को नामासि'][12] **इत्याचार्यः**॥

---

१. cf *KātŚS* 13.2.24: मज्जयः. २-२. M^1 H^1 H^2 broken, M^1 H^1 उप मा पक्ष...इत्याह, H^2 मरुतस्स...त्याह. ३-३. M^1 H^1 H^2 om; thus M Ad. ४. M Ad °मूहर्यक्ष°. ५-५. M^1 H^1 H^2 om; thus M Ad. *-*. M^1 H^1 H^2 om; thus M Ad. ६. M Ad वरै°. ७. M Ad मन्वगृ°. ८. M Ad °म्नात्ता°. ९-९. M^1 H^1 H^2 om; thus M Ad. १०. M^1 H^1 H^2 om. ११. M Ad om. १२. M Ad om.

[1]**ततो** 'असौ नामास्मि'[1] **इति नाम प्रब्रूते॥ १३॥**

प्रसवं जपति–'देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं (भगा-)[2]य [3][दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदातु नः'।][3]॥ **१४॥**

[अथैनं][4] प्रोक्षति–'[5]अद्भ्यस्त्वा प्रोक्षामि'; 'ओषधीभ्यस्त्वा प्रोक्षामि'; 'वनस्पतिभ्यस्त्वा प्रोक्षामि'; 'द्यावापृथिवीभ्यां[6] त्वा प्रोक्षामि'; '[7]सुभूताय त्वा[7] प्रोक्षामि'; 'ब्रह्मवर्चसाय त्वा प्रोक्षामि' **इति॥ १५॥**

अथास्य दक्षिणेन हस्तेन [8][दक्षिणं हस्तं साङ्गुष्ठं गृह्णाति–'अग्निस्ते हस्तमग्रभीत्'; 'सोमस्ते हस्तमग्रभीत्'; 'सविता ते हस्तमग्रभीत्'; 'सरस्वती ते हस्तमग्रभीत्'; 'पूषा ते][8] हस्तमग्रभीत्'; 'बृहस्पतिस्ते हस्तमग्रभीत्'; 'मित्रस्ते[9] हस्तमग्रभीत्'[10]; 'वरुणस्ते हस्तमग्रभीत्'; 'त्वष्टा ते हस्तमग्रभीत्'; 'धाता ते हस्तमग्रभीत्'; 'विष्णुस्ते हस्तमग्रभीत्'; 'अꣳशस्ते हस्तमग्रभीत्'; [11]'भगस्ते हस्तमग्रभीत्'; 'अर्यमा ते हस्तमग्रभीत्'। 'अगन् समगन् स हि मित्रस्त्वमसि धर्मेणाग्निरहमाचार्यः' **[इति]॥ १६॥**

तं [12]**[परिददाति**–'कशकाय त्वा परिददामि'; 'अन्तकाय त्वा परिददामि'; 'अघोराय त्वा परिददामि'; 'वरुणाय त्वा परिददामि'; 'मृत्यवे त्वा परिददामि'; 'यमाय त्वा परि]ददामि'[12]; 'गदाय त्वा परिददामि'; 'गदगाय त्वा परिददामि';

१-१. M^1 H^1 H^2 om; thus M Ad. Hereafter the, remaining *Vṛtti*- text of *Upanayana* in M, Ad is missing. Here both M and Ad end with remark: 'इति वाधूलकल्पसूत्रव्याख्या समाप्ता॥ समाप्तश्चायं ग्रन्थः।' The remaining complete original *sūtra*-text of *Upanayana* is found in M^1 on p.6, line 15 to p.10, line 4, H^1 p.10, line 13 and in H^2 p.5, line 2 to p.8, line 3. The text of *Vṛtti* is available neither in M nor in Ad. २. M^1 यज्ञ=यः...प्रो, H^1 यज्ञ=य, H^2 ०पतिंधन्त...०भिः प्रो०. ३-३. M^1 H^1 broken. ४. M^1 H^1 H^2 broken. ५. H^2 अद्भि०; thus M^1. ६. H^2 ०थिवीन्त्वा; thus M^1 H^1. ७-७. H^2 broken. ८-८. H^2 broken afetr ०वर्चसं त्वा upto पूषा ते, M^1 H^2 broken after हस्तेन, H^1 after त्वा see; *ĀgniGS*.1.1.3:8.5. ९. M^1 त्वष्टा ते, H^2 मित्रणस्ते. १०. M^1 om. ११. M^1 H^1 H^2 जगस्ते. १२-१२. M^1 H^1 broken before ददामि while H^2 before गदाय तं...ददामि.

'अन्तकाय त्वा परिददामि'; 'अꣳहूराय त्वा परिददामि'; 'वशिन्यै[१] त्वा (परिददामि')[२]; 'मृत्वियायिन्यै[३] (?) त्वा परिददामि'; 'अस्यै त्वा सवैश्वानरायै परिददामि'; 'प्राच्यै त्वा दि[शे परिददामि'; 'प्रतीच्यै त्वा दिशे][४] परिददामि'; 'उदीच्यै त्वा दिशे[५] परिददामि'; 'ऊर्ध्वायै त्वा दिशे परिददामि'; 'दिग्भ्यस्त्वा परिददामि'; 'अवान्तरदिशाभ्यस्त्वा परिददामि' **[इति]॥ १७॥**

अथैनं परिगृह्य जपति–'बोधश्च त्वा प्रतिबोधश्च रक्षताम्'; 'अस्वप्नश्च त्वाऽनवद्राणश्च रक्षताम्'; 'गोपायꣳश्च त्वा[६][जागृविश्च रक्षताम्'; 'ते त्वा रक्षन्तु ते त्वा गोपायन्तु तेभ्यो नमस्तेभ्यः स्वाहा' **[इति]॥ १८॥**

पुनर्जपति 'जीवेभ्यस्त्वा समुद्रे वायुरिन्द्रो धाता दधातु सविता त्रा][६]यमाणः। [७]यस्त्वा हिꣳसति स[८] रक्षताम्'; 'ते देवास्ते देवयातयस्ते त्वा देवा देवरक्षयो रक्षन्तु'; 'ते[९] [१०]देवास्ते देवा अयातयस्ते त्वा देवा आत्मरक्षयो रक्षन्तु' **इति॥ १९॥**

अथास्य दक्षिणं कर्णमातृणत्ति–'भूः ऋचा ते कर्णमातृणद्मि'; 'भुवो [११]यजु[षा ते कर्णमातृणद्मि'; 'सुवः साम्ना ते कर्णमातृणद्मि'][११] **इति॥ २०॥**

एवमेवोत्तरम्॥ २१॥

अथास्य दक्षिणे कर्णे जपति–'अग्निर्वै देवानामन्नादो(ऽन्नादो)[१२]भूयाः' **इति॥ २२॥**

अथोत्तरे–'सोमो वै देवानां यशो यशस्वी[१३] भूयाः' **इति॥ २३॥**

अथास्य दक्षिणे कर्णे जपति–'आयुष्टे' **इति**[१४]॥ २४॥

'आयुष्टे विश्वतो दधद्' **इति॥ २५॥**

अथोत्तरे–[१५]['आयुर्दा अग्ने' **इति**] [१६]**प्रार्जयति (?)॥ २६॥**

---

१. M[1] H[1] H[2] वशेन्यै. २. M[1] H[1] H[2] om. ३. M[1] H[2] ०यायेऽन्यै. ४. M[1] H[1] H[2] broken. ५. M[1] दिदिशे; thus H[2]. ६-६. M[1] H[1] broken त्व...यमाणा cf *AV*. 8.1.13-15. ७. M[1] H[1] चत्वा. ८. M[1] H[1] च. ९. M[1] H[1] H[2] om. १०. M[1] H[1] दैवा०. ११-११. M[1] H[1] broken. १२. M[1] H[1] H[2] om. १३. H[1] यशो स्वी. १४. M[1] H[1] show the end of *Khaṇḍa* and repeat the *sūtra*. १५. M[1] H[1] H[2] broken. १६. M[1] H[1] मार्जति.

अभिप्राणिति–'प्रजापतेस्त्वा प्राणेनाभिप्राणिमि'[१] **इत्येनमभिप्राणिति।** '०पूष्णः [२]पोषेणोभाभ्यां दीर्घायुत्वाय शतशारदाय शतꣳ शरद्भ्य आयुषे वर्चसे' **इति॥ २७॥**

तमपरेणाग्निं पूर्वेणात्मानमुदञ्चमप्यर्जयति[३]–'अग्नाविष्णू मा वामवक्रमिषं वि [४][जिहाथां मा मा सं ताप्तं लोकं मे लोक]कृतौ कृणुतम्' **इति॥ २८॥**

अथैनं समिधमाधापयति– 'एषा तेऽग्ने समित्तया वर्धस्व चाप्यायस्व वर्धिषीमहि च वयमा च प्यासिषीमहि स्वाहा' **इति॥ २९॥**

अथैनमाह– 'ब्रह्मचार्यसि समिध आधेहि, अपोऽशान, कर्म कुरु, मा दिवा स्वाप्सीः'[५] **इति॥ ३०॥**

अथैनं प्राह–'अग्ने ब्र[६][ह्मचार्यसौ तं ते ब्रूमस्तं ते परिदद्मः'; 'वा]यो ब्रह्मचार्यसौ तं ते प्रब्रूमस्तं ते परिदद्मः'; 'आदित्य ब्रह्मचार्यसौ तं ते प्रब्रूमस्तं ते[७] परिदद्मः'; 'वरुण[८] ब्रह्मचार्यसौ तं ते प्रब्रूमस्तं ते परिदद्मः' **इति॥ ३१॥**

अथैनमुत्थापयति– 'उदायुषा [९](स्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताँ) अनु[९]' **इति॥ ३२॥**

अथादित्यमुपस्थापयति– '[१०]तच्च[क्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं नन्दाम शरदः शतं मोदाम शरदः शतं भवाम शरदः शतं प्र ब्रवाम शरदः शतमजीताः स्याम शरदः शतम्' **इति**][१०]॥ **३३॥**

[त्रि]यहे[११] **पर्यवेते त्रिपदां सावित्रीं त्रिरन्वाह यद्यनूक्तसावित्रीकः॥ ३४॥**

अथ यद्यन[१२]**नूक्तसावित्रीकस्तदानीमेव प्राङासीनः प्रत्यङ्ङासीनाय** 'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्' **इति॥ ३५॥**

पच्छोऽनूच्य 'भूर्' **इति पदं दधाति॥ ३६॥**

[१३]['भुवर्' **इति**] [१४]**पादमनूच्य** 'सुवर्' **इति पदं दधाति॥ ३७॥**

---

१. M[1] H[1] ०णिमित्ये०. २. M[1] H[1] पूषे०. ३. M[1] H[1] ०प्यर्जति ०प्यर्घति. ४. M[1] H[1] ०क्रमींद्वि...कृतौ. ५. M[1] H[1] स्वप्सीः. ६. M[1] अग्ने ब्र...यो ब्रह्म०. ७. M[1] तं ते twice. ८. M[1] वरुणो, H[1] om. ९-९. M[1] H[1] उदायुषा=अन्वि०. १०-१०. M[1] H[1] H[2] broken. ११. M[1] यहे, H[1] चहे.१२. M[1] H[1] H[2] ०द्यनूक्तसा०. १३. M[1] broken. १४. M[1] H[1] वादमनू०, H[2] वाम०.

स यत्र प्रवत्स्यन्नाह 'प्रब्रुवेदं[१] भगव', 'इदं वत्स्यामि' **इति॥ ३८॥**

तदनुमन्त्रयते–'यामग्निर्वायुरादित्यश्चन्द्रमा आपः स्वस्तिमनुसञ्चरन्ति। ताꣳ स्वस्तिमनुसञ्चरासौ वा यावानार्तायां देवतायां मोदन्तः प्राणेष्वन्तः प्राणेषु' **इति॥ ३९॥**[२]

[३[परिषेक]प्रभृत्याऽग्निमुखात्[३] कृत्वा [४]व्रतसमिधोऽभ्याधापयति– 'अग्ने व्रतपते सावित्रं व्रतं चरिष्यामि तच्छकेयं[५] तन्मे राध्यताꣳ स्वाहा'; 'वायो व्रतपते [६](सावित्रं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताꣳ स्वाहा')[६]; 'आदित्य व्रतपते [७](सावित्रं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताꣳ स्वाहा')[७]; 'व्रतानां व्रतपते सावित्रं व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताꣳ स्वा[हा' **इति]**[८]॥ **४०॥**

प्राचीं वा दिशम्[९] **उपनिष्क्रम्याग्निमुपसमाधाय यत्रास्य पलाशः स्पष्टो भवति तदधस्तात् तस्मिन्नेवाग्नौ व्रतं विसृजते प्रतिलोमम्**– 'आदित्य व्रतपते (सावित्रं व्रतमचारिषं तदशकं तन्मेऽराधि)[९]'; 'वायो व्रतपते (सावित्रं व्रतमचारिषं तदशकं तन्मेऽराधि)[१०]'; 'अग्ने व्रतपते (सावित्रं व्रतमचारिषं तदशकं तन्मेऽराधि)[१०]'; 'व्रतानां व्रतपते सावित्रं व्रतमचारिषं [११]['तदशकं तन्मेऽराधि' **इति॥ ४१॥**

मन्त्रवत् परिषिच्य दण्डमादाय गन्धपुष्पादिभिरर्चयित्वा पा-][१२] **यसेनापूपैर्दण्डाय बलिं दत्त्वा विस्रस्य मेखलामजिनं यज्ञोपवीतं तत्रैव निधायान्यानि गृहीत्वा दण्डमुपतिष्ठते**–'सुश्रवः सुश्रवसं मा कुरु यथा त्वꣳ सुश्रवः सुश्रवा अस्येवमहꣳ सुश्रवः सुश्रवा भूयासम्'; 'यथा त्वं सुश्रवः सुश्रवा [देवानां निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मणो निधिगोपो][१३] भूयासम्' **इति॥ ४२॥**

---

१. M^1 प्रब्रवैमं ०भग०, H^2 ०ब्रूवै, भग०. २. M^1 H^1 H^2 indicate the end of *Khaṇḍa*. ३-३. M^1 H^1...प्रकृत्याग्निमुखान्, H^2 ...इत्य० मुखात्. ४. H^2 प्रातस्समि०; thus M^1 H^1. ५. M^1 ०केय गꣳ त०. ६-६. M^1 H^2 om. ७-७. M^1 H^2 om. ८-८. M^1 H^1 ...वा दिशमु०; thus H^2. ९. M^1 H^1 H^2 om. १०. M^1 H^1 H^2 om. ११. M^1 H^1 H^2 om. १२-१२. M^1 H^1 ०चारिषं...य धेनापूपै०, H^2 अपूपै०. १३. M^1 सुश्रवा...भूयासम्० see *ĀpMP* 2.5.1.

दण्डं प्रदक्षिणं कृत्वा 'यस्य ते प्रथमवास्यꣳ[१] हरामस्तं[२] त्वा विश्वे अवन्तु देवाः। तं त्वा भ्रातरः सुहृदो[३] वर्धमानमनु जायन्तां बहवः सुजातम्' **इति जपेत्॥ ४३॥**

यदि पलाशो दूरतरो[४] भवेदाहृत्य पलाशꣳ सशाखं तत्रैवोच्छ्रित्य योजयेत्॥ ४४॥

[५]स्व[स्त्ययनं] पुण्याहं स्वस्त्यृद्धिमिति वाचयेत्॥ ४५॥[६]

इति द्वितीयाध्याये प्रथमः खण्डः

---

१. M^1 प्रथमा वा°; thus H^2. २. M^1 तत्वा; thus H^2. ३. cf *ĀpMP* 2.6.15; *ĀgniGS*.1.1.4:11.7 सुवृधो. ४. H^2 दूरतो; thus M^1 H^1. ५. M^1 H^1 स्वा...पुण्या°, H^2 स्वाहा...हꣳ स्व°. ६. M^1 H^1 H^2 wrongly give the text beginning with पाणिग्रहण (M^1 p.10, line 5, H^1 p.16, line 14, H^2 p.8, line 4) here. the text actually belongs to *Aupāsanāgni-karma*, so it has been shifted to its proper place; see fn 1 on p.50.

अथ द्वितीयाध्याये द्वितीयः खण्डः

अथादित्योपस्थानम्[1]

[2]['उद्वयं तमसस्परि', 'उदु त्यं', 'चित्रं', '[2]तच्चक्षुर्देवहितम्' **इत्यादित्यमुपस्थापयेत्॥ १॥**

वृत्तिः–'तच्चक्षुः' इत्यस्य 'ज्योक् च सूर्यं दृशे' इत्यन्तः[3]। अर्थैकत्वादेकं वाक्यं प्रतिवेद्यमित्यनेन न्यायेन विधिः॥

इति द्वितीयाध्याये द्वितीयः खण्डः

---

१. Due to displacement of folios, the text belonging to *Ādityopasthāna* has been wrongly given on p.503, line 20- p.504, line 2 in M and on p.989, line 14 in Ad after *Sīmantonnayana*. Since it belongs to the later part of the *Upanayana*, hence it has been shifted here at its proper place. २-२. M Ad ...पर्युदुत्यं च तच्चक्षु°. ३. M इत्येहोन्त, Ad इत्यहोन्त.

अथ द्वितीयाध्याये तृतीयः खण्डः

अथ ब्रह्मचारिणो निषिद्धकर्माणि

(यदि)[1] **अमेध्यं [पश्येद् 'अबद्धं मनो दरिद्रम्' इति जपेत्]**[2]**॥ १॥**

वृत्तिः—प्रतीकग्रहणम्॥

न स्त्रिया शूद्रेण वदेदिति॥ २॥

वृत्तिः—सहयोगलक्षणा तृतीया॥

उच्छिष्टं न दद्यादिति॥ ३॥

वृत्तिः—स्त्रीशूद्राभ्यामिवेति गम्यते॥

न स्नायादिति॥ ४॥

वृत्तिः—आप्सवस्नानस्य[3] प्रतिषेधः। विशिष्टस्य स्नानस्य ब्रह्मचारित्वादेव निवृत्तेः। दिवाकीर्तिः अस्पर्शनादिनिमित्तमाप्सवः, न नैमित्तिकत्वात् प्रवर्तते एव॥

[4]ससन्ध्यं भुञ्जीतेति[4]॥ ५॥

वृत्तिः—सायमशक्यस्य प्रतिषेधः, तेन सकृद्भोजनम्॥

पर्वसु स्नायादिति॥ ६॥

पञ्चदश्याममावस्यां[5] **प्रतिप्रसवः उपवसेच्च॥ ७॥**

प्रातर्भोजनस्यापि प्रतिषेधः पर्वसु॥ ८॥

प्रातर्वद्विसर्गे 'वयः' **वर्जमिति॥ ९॥**

वृत्तिः—प्रातरित्यस्य सप्तम्यर्थे वति। 'वयः' वर्जमिति 'वयः सुपर्णा' (तैब्रा. २.५.८.३) इत्यस्य मन्त्रस्यार्थलुप्तः। सैव प्रतिषेधो [6]नात्यनुवादः॥

इति द्वितीयाध्याये तृतीयः खण्डः

---

१. M Ad om. २. M Ad broken, cf *ĀgniGS.* 2.2.3:17.17. ३. M Ad °त्यप्सनवस्य. ४-४. M Ad सासदयं गुञ्जतेति. ५. M Ad °दश्यामाप्सनव. ६. M Ad °षेधोऽनात्य°.

अथ द्वितीयाध्याये चतुर्थः खण्डः

अथ काण्डव्रतम्

अथ [1]काण्डव्रतानीति॥ १॥

वृत्तिः—संज्ञानिर्देशः [2]काण्डसामान्यसंबन्धख्यापनार्थः। तेन प्रतिकाण्डमावृत्तिः संस्कारत्वादप्रच्यवमाना[3] भवति। काण्डसमाख्या हि प्रकरणैकत्वं प्रदेशैकत्वं चावेक्ष्य वर्तते। तत्र दार्शपौर्णमासिकानां प्राजापत्यमित्यु[4]च्यमाने दर्शपूर्णमासयोर्व्याख्यानभूतानां काण्डानामत्र याजमानप्रभृतीनां बहुत्वात् तत्संस्कारत्वाच्च व्रतस्य प्रतिकाण्डमभ्यावृत्तिः प्रसज्येत। तत्र काण्डसामान्यसंबन्धार्थः संज्ञया निर्देशः सप्रयोजनः, न च तावता सर्वव्रतानां सर्वकाण्डसंबन्ध आशङ्कनीयः। पुनर्दार्शपौर्णमासिकानां प्राजापत्यमित्येवमादेरानर्थक्यप्रसङ्गात्। तस्माद्यानि काण्डानि दर्शपूर्णमाससंबन्धीनि तैः सर्वैः संबन्धः प्राजापत्यस्येत्येवमादि योज्यम्।

दार्शपौर्णमासिकानां प्रयाजाः वैश्वदेवमिति देवताभिः संबन्धो व्रताना—मुच्यते। यथादेवतं काण्डर्षीनोप्य एतासां देवतानाम् 'आपो वा' यथादेवतं काण्डर्षीनोप्य इत्यत्र 'अमुष्मै काण्डर्षये स्वाहा' इति होतव्यः। सदसस्पतिं चोप्येत्येव संबन्धनीयम्। सदसस्पतये चापि 'सदसस्पतिम्' इत्यनेन मन्त्रेण 'होतः कुत एतत्' यावता यदि हि देवता मन्त्रं चतुर्थ्यन्तमुच्चार्य होमो निर्दिष्टः[5] स्यात् तथैवोच्चारयन् 'याज्ञिकीभ्यो होतृभ्यः स्वाहा' इतिवत्। पूर्ववत्तु होमो यथा स्यात्। एतासां देवतानामित्येवमर्थं देवतानिर्देशमात्रं क्रियते। तेन वैश्वदेवमिति। यद्यपि समस्ता विश्वेदेवशब्दास्तद्धितोत्पन्नाः, तथापि यत्र प्रजापतिस्तत्र विश्वेदेवा इति पूर्वत्र समस्यैव। होमदर्शनादत्र 'विश्वेभ्यो देवेभ्य' इत्येव होमः सिद्धो भवति। उक्तं व्रतसमिधामभ्याधानम्॥

इति द्वितीयाध्याये चतुर्थः खण्डः

---

१. M Ad खाण्ड°. २. M Ad खाण्ड°. ३. M Ad °प्रच्यमाना. ४. M Ad प्राजापत्युच्य°. ५. M Ad निर्दिष्टं.

अथ द्वितीयाध्याये पञ्चमः खण्डः

अथ कारीरीव्रतम्

अथ [१]कारीरीव्रतमिति॥ १॥

वृत्तिः—करीरिर्वृष्टिकामेष्टिरुच्यते[२]। 'मारुतमसि मरुतामोजः' (तैसं. २.४.७.१) इत्यारभ्य विहिता तद् ग्रन्थाध्ययन एतद् व्रतम्। ते चत्वारोऽनुवाकाः[३]॥

चतूरात्रमक्षारलवणं[४] भूमौ गोवत् भुञ्जीतेति॥ २॥

वृत्तिः—केवलायामेव भूमौ हस्तेन विना मुखेनैवादाय भोक्तव्यम्। गोवदिति चैतावदेवातिदिश्यते। तथा कारावतमित्यवयवार्थः, तिरस्कारेणैव कर्मणि वर्तते। तस्मिन्नपि कारीरीव्रतेतिकर्तव्यताऽतिदिश्यते। 'न भूमौ न पशुवत्' भुञ्जीतेति अतिदेशेन प्राप्तस्य प्रतिषेधः। अतश्चतूरात्रमक्षारलवणमित्येतावदत्र कर्तव्यम्। अनयोर्व्रतयोर्होमो नास्ति, अवचनात्। इतरेषां वैश्वदेवमिति ह्यपि सर्वार्थः सकृदेव क्रियते, न प्रत्येकमावर्तत इत्युक्तम्॥

इति द्वितीयाध्याये पञ्चमः खण्डः

---

१. M Ad काधीरी°. २. Here both M and Ad show the end of the *Khaṇḍa* with the sign. ३. See *TaitS.* २.४.७–१०. ४. M Ad °मक्षराल°.

अथ द्वितीयाध्याये षष्ठः खण्डः

अथ कारावतम्

[अथ कारावतमिति॥ १॥][1]

तस्यानुवाका इति॥ २॥

वृत्तिः—प्रकृतस्य कारावतस्य संबन्धिनोऽनुवाकानाचष्टे। नहि कारावतशब्दः [2]कारी[री]व्रतशब्दवत् स्वयमेवानुवाकानप्यन्तर्भावयितुं शक्नोति, रूढित्वात्॥

सावित्रप्रभृत्यौषध्यनु[3]वाकादिति॥ ३॥

वृत्तिः—सावित्रशब्देन 'युञ्जानः प्रथमं मनः' (तैसं. ४.१.१.१) इत्येतद् गृह्यत इति स्मरन्ति। 'ओषधय' (तैसं. ४.१.४.१२) इति [4]आन्दमभिविधाविष्यते॥

इति द्वितीयाध्याये षष्ठः खण्डः

---

१. M Ad om. २. M Ad कारीशब्दो. ३. M °त्योध्वर्नुवा°; त्योपध्वनुवा°. ४. M Ad आन्दयम° doubtful.

अथ द्वितीयाध्याये सप्तमः खण्डः

अथ गोदानव्रतम्

अथ गोदानव्रतमिति॥ १॥

वृत्तिः—संज्ञया निर्देशसामान्यस्मृतिविहितस्य षोडशे वर्ष इत्येवमादेः परिग्रहार्थः॥

तस्य चौलवत्कल्पो व्याख्यात इति॥ २॥

वृत्तिः—पूर्वेद्युः कर्माद्यतिदिश्यते॥

[1]एतावन्नानाऽऽवापमनुव्रतसमिध इति॥ ३॥

वृत्तिः—एतावन्नानेति भेदप्रदर्शनार्थम्। [1]आवापशब्देन तत्संबन्धो होमो वक्ष्यते॥

होमादनन्तरं व्रतमपि[2] आधापयितव्यम्[3]॥ ४॥

वृत्तिः—कस्य [4]वा नित्यमेतत् ब्रह्मचर्यम्[5] इति। अधिशब्दातिरिक्त इत्येवं कर्म वचनीयम्। ईश्वरता च प्राधान्यापेक्षा[6]। [7]तदस्त्येवेश्वरवचनमित्येव सप्तमी। तेन नित्यं ब्रह्मचर्यं वक्ष्यमाणं व्रतप्रधानं गोदानस्य शेषत्वेन विधीयते। व्रतानां च [8]प्राधान्यमादावेव परिरक्षार्थमुच्येत। तस्य नित्येनैव ब्रह्मचर्येण। 'ब्रह्मवर्येण' इति केचित् पठन्ति। तत्रापि फलं तुल्यं सवियोगलक्षणवाक्तृतीयायाः अनर्हित-वसनमिति। वपाशनस्य [9]ब्रह्मचारिव्रतेष्वेव प्रतिषेधादिहान्यस्याप्यवधायकः। स्प्यकटकं बलादेः प्रतिषेधात्॥

१-१. In both M and Ad text is given after *Vṛtti* as: एतावन्नानेति भेदप्रदर्शनार्थं, एतावन्नानाऽऽवापमनु व्रतसमिध इति. २. M Ad व्रतमसि. ३. M Ad °तव्याः. ४. M Ad कस्त्या नि, Ad कस्यानि°. ५. M Ad °चर्य इति. ६. M Ad indicate here the end of *Khaṇḍa*. ७. M Ad तदस्त्यैवे°. ८. M Ad प्राधानमा°. ९. M Ad °चारीव्रते°.

तृषवणमुदकोपस्पर्शनम्[१] इति॥ ५॥

वृत्तिः—तृषवणशब्दः [२]पूर्वाह्णमध्यन्दिनापराह्णेषु वर्तते।

संवत्सरपरं द्वादशरात्राविममित्येव[३] तेषां चरणमिति॥ ६॥

अनुक्तकालानां सर्वेषामेव कालविधानं, यावत् श्रयणं वेति॥ ७॥

वृत्तिः—सामर्थ्यात् [४]काण्डव्रतेष्वेव। स हि गोदानमध्ययनमध्ययनशेषेण विधीयते। सर्वेषां कालमिति वक्ष्यमाणस्य सर्वव्रतशेषत्वमाह[५]। 'व्रतानि चरित्वोपनयेत्' इत्यस्य[५] शब्दस्यार्वागुपनयनप्रतिषेधार्थत्वात् पूर्वमेव व्याख्यातम्। उपक्रमावसानयोर्वेत्यवसानस्य पुनर्ग्रहणमुपक्रमे विधानाद् बाधा मा विज्ञायीति। अयं यद्यवसानग्रहणमकृत्वा उपक्रमयेदित्येता[६]वदेवोच्येत, उपक्रमावसानयोर्वपनं स्यात्, न समुच्चयः। ततश्चोपक्रमे यावन्न[७] तदावसाने वपनं बाध्येत। तन्निवृत्त्यर्थं पुनरवसानग्रहणम्।

गोदानं चरित्वा सनखश्मश्रु[८] वपेदिति॥ ८॥

वृत्तिः—गोदानस्य यदुत्तरकालं वपनं तत्र [९]सनखश्मश्रुवपनमुच्यते। अतएव च ज्ञापकं ब्रह्मचारिणो नखश्मश्रुवपनं नास्ति इति। श्मश्रुशब्दत्वादत्र[१०] रोमविषयो द्रष्टव्यः लक्षणया, यतः[११] समाचाराद्विनापि हि वचनेन श्मश्रूणि[१२] दान्ति।

एकशिखः स्यादिति॥ ९॥

वृत्तिः—चोलवदतिदेशेन यथर्षिशिखा विभजेद्, यथा वा कुलधर्मः स्यादिति प्राप्तस्य प्रत्याम्नायः। ऊर्ध्वमयमेव शिखाविभागः।

विसर्गे गां ददातीति॥ १०॥

वृत्तिः—विसर्गशब्दोपादानाद्वपने चरित्वेत्येतदपि विवक्षितमिति मन्यन्ते। तथा सति पूर्वस्मिन्नपि वपने सनखश्मश्रुवपनं कर्तव्यम्॥

इति द्वितीयाध्याये सप्तमः खण्डः

---

१. M Ad °मुदकेपस्पर्श [M श°]. २. M Ad शूर्पाह्ण°. ३. M Ad °त्रावममि°. ४. M Ad कार्ण व्रते°. ५-५. M Ad °माहाव्रतानि चरित्वानुपवेदित्यस्या. ६. M °क्रमयेवत्येता°. ७. M Ad यावनन्तदा°. ८. M Ad सनस्वश्म°. ९. M Ad सः नख°. १०. M Ad °त्वात्र. ११. M Ad सतस्. १२. M Ad °श्रून्निहन्तिहि दान्ति.

अथ द्वितीयाध्यायेऽष्टमः खण्डः

अथ उपाकर्मविधिः

अथ श्रावण्यां पौर्णमास्यामुपाकर्माषाढ्यां[1] वेति॥ १॥

वृत्तिः—यद्यपि सर्वेषु संवत्सरेषु श्रवणेन युक्ता पौर्णमासी न संभवति, तथापि श्रवणस्य पौर्णमास्युपलक्षणत्वाच्छ्रावणे मासि या पौर्णमासी तस्यामेतत् कर्तव्यम्। एवमाषाढ्याम्। उपाकर्मशब्दस्य उपाकरणशब्देन समानार्थस्य नित्यं सकर्मकत्वात् कस्येत्यपेक्षायां स्मृत्यन्तरवशात् स्वाध्यायस्येति गम्यते। तथाप्याहुः—'अथात उपाकर्म स्वाध्यायस्ये'ति। इहापि स्वाध्यायाध्ययनस्योत्तरत्रविधानादस्यापि व्रतवदेव[2] ग्रहणात् ब्रह्मचारिण उपदेशः। ततश्च तत्कर्तृकत्वात् लोकाग्नौ प्रवर्तते। सूतकाग्निसद्भावेऽपि तस्मिन् प्रवृत्तिरस्य न संभवति। शिष्येष्वन्वारब्धेष्विति बहूनां साधारणसूतकाग्निः संभवति। यद्यपि कदाचिदेक एव शिष्यः स्यात् तथापि शास्त्रावधारणवेलायां प्राप्तस्य सूतकाग्नेः संभवदर्शनात् पुनर्ग्रहणं न युज्यते॥

शिष्येष्वन्वारब्धेषु सर्वान् काण्डर्षीन् जुहुयादिति[3]॥ २॥

वृत्तिः—शिष्यान्वारंभः समाचारादेव प्राप्नोति। सर्वत्र एव हि ऋत्विक्कर्तृके पाकयज्ञे प्रधानकर्तु[4]रन्वारंभ इष्यते। कर्तुः प्राप्तमेव पुनरुच्यते[5] बहुत्वविधानार्थः। इतरथा हि कर्तृभेदात् प्रतिशिष्यमावृत्तिः कर्मणः प्रसज्येत। तन्मा भूदित्येवमर्थं शिष्येष्वन्वारब्धेष्वित्याह॥

'[6]उपहूतं मनः' **इति प्राजापत्यायाः सर्वमनुवाकं जुहुयादिति॥ ३॥**

वृत्तिः—आवापस्थाने प्राजापत्यायाः सौविष्टकृत्याश्च होमो नास्ति। अन्ते त्वतिदेशादेव प्राप्नुतः। एवं तर्हि तस्मिन्ननुवाके तयोः पाठोऽनर्थकः तस्यामेतत्। तथापि शैलीयमाचार्यस्य यदन्ते प्राजापत्यां सौविष्टकृतीं च पठति, [7]गृह्येऽपि कर्तव्यताप्रदर्शनार्थम्॥

---

१. M Ad ०षाढ्या. २. M Ad व्रतपदेव. ३. M Ad indicate the end of *Khaṇḍa*. ४. M Ad ०कृर्तृ०. ५. M Ad पुनरिच्यते. ६. *VādhŚS.* 15.3.1-11. It may be pointed out that this *Anuvāka* is found in *Vādhūla Śākhā* only, not in others. ७. M Ad गृहेति.

अपरेणाग्निं प्राङ्मुखा उपविश्याधीयीरन्निति[१]॥ ४॥

वृत्तिः—अविशेषात् सर्वे, आचार्यः शिष्याश्च। आचार्यो निगदति, शिष्याः पठन्ति। द्वितीयादिप्रयोगे सहैव पठन्ति। काण्डैकत्वं[२] प्रदेशैकत्वं[३] प्रकरणैकत्वं चावेक्ष्य इत्युक्तम्। अन्यथा हि दार्शपौर्णमासिकानां प्राजापत्यमिति बहुवचनं नोपपद्यते। पर्वणि चाध्ययन[४]वचनाद्धोमान्तेऽध्ययनं, होमादन्यस्यावा[५]पस्यान्ते निवेश इति व्याख्यातत्वात्॥

त्रियहमेकाहं[६] **वा नाधी[यीतेति]**[७]॥ ५॥

वृत्तिः—एकाहानामनध्यायविधा[८]नस्यानर्थक्यप्रसंगात्। पर्वत्वादेव हि तदहरनध्यायः सिद्धः॥

मासं प्रदोषं चेति॥ ६॥

वृत्तिः—मासशब्द उक्तार्थः। प्रदोषशब्दश्च पूर्वस्मिन् रात्रिचतुर्थभागे वर्तते। अत्रापि [९]नाधीयीरन्नित्येव संबन्धः कर्तव्यः॥

ततः सर्वमादिवर्तमानानन्तरमेवाश्रमान्तरं प्रवेष्टव्यमनाश्रमिणाना-स्थाप्यमिति॥ ७॥

वृत्तिः—वाधूलको ह्यसौ बभूव। एष त्रिंशद्वर्षाण्यतीत्यात्र स्नातवानिति विशेषेण ज्ञायते। समावृत्तस्याश्रमान्तरमप्रविश्य किञ्चित् कालमस्तीति किमर्थमिति चेद् वेदवेदाङ्गार्थाधिगमाय॥

तथा बौधायनैरुक्तः[१०]॥ ८॥

वृत्तिः—यदैवं स्थीयते तदा व्याहृतिभिराज्यहोमो बौधायनीयैराम्नायते। अनुष्ठेयकृतत्वादमुख्योऽयं पक्ष आचार्यस्य॥

---

१. M °विश्यादीयरन्निति, Ad °विश्य दीयरान्निति. २. M काण्डैत्वं, Ad काण्डैस्त्वं. ३. M Ad प्रदेशत्वं. ४. M Ad °ध्ययनं वच°. ५. M Ad °स्यावपस्यान्ते. ६. M Ad °मेताहं. ७. M Ad broken after नाधी...; thus *VādhGVR.* 4.286. ८. M Ad °काहानाध्यायविधायनस्या°. ९. M Ad नासीरन्नि°. १०. M Ad indicate here the end of *Khaṇḍa*.

एवं पाकयज्ञ उक्तः[१]॥ ९॥

अथेदानीमपूर्वपक्षे प्रयोग उच्यते॥ १०॥

ब्रह्मप्रणीतावर्जमाज्यसंस्कारान्तमग्निमुखं कृत्वा आचम्य मन्त्रैः परिषिच्य तूष्णीं वा...[२]**परिषेकं कृत्वाऽथैतां पालाशीं समिधमित्यादि**॥ ११॥

चन्द्रमस उपस्थानं कृत्वा पूर्ववत्परिषिञ्चेत्॥ १२॥

अत्र केचित्–'यशो मा कुरु ब्राह्मणेषु' **इत्येतां हुत्वा** 'अग्नये स्विष्टकृते स्वाहा' **इति स्विष्टकृतं जुह्वति**[३]॥ १३॥

'यदस्य कर्मणोऽत्यरीरिचम्' **इत्यपरे**॥ १४॥

नैव स्विष्टकृद्धोम इत्यन्ये॥ १५॥

इति द्वितीयाध्यायेऽष्टमः खण्डः

---

१. M Ad उक्तेः. २. M Ad वा...परि°. This text is also found on p.514, line 9-11 in M and p.1008, line 1- p.1009, line 1-3 in Ad. It is not very clear whether this text belongs to उपाकर्म or विवाह ritual or to both. ३. M Ad जुहोति.

अथ द्वितीयाध्याये नवमः खण्डः

अथ अर्घ्यदानम्[1]

...[2]अलङ्कारैर्गृहाञ्छोभयित्वा[3] यथोक्तं त्रिवृदासनं कल्पयित्वा-ऽऽसनसमीपे बहून् दर्भानास्तीर्य तेष्वर्घ्यपाद्याचमनीयमधुपर्क[ार्थानि][4] नाना प्रोक्षण्यर्थानि षट् पात्राणि सादयति॥ १॥

कामण्डलुका[5]भिरेव पात्राणि[6] प्रोक्षतीति[7]॥ २॥

वृत्तिः– प्रोक्षणवोत्पञ्च [7]अर्घ्यपाद्याचमनार्थमुदकमेकस्मिन्नेव पात्रे संस्कृत्यानेन[8] ददति। तेषां चत्वारि केचिदुदकार्थमेवैकं[9] पात्रं संस्कृत्य तदातदा तस्मिन् [एकै-][10]कमानीयार्घ्यपाद्याचमनीयं च ददति। तेषां त्रीणि सर्वत्र प्रोक्षणीयग्रहणे [11]तदर्थमनुष्यकार्यत्वात् सहैतानि न्युब्ज्य ततः [12][प्रसि]द्धं प्रोक्षणीयं संस्कृत्य ताभिः कामण्डलुकाभिर्वोत्तानानि पात्राणि कृत्वा प्रोक्षति॥

ततोऽर्घ्याद्युदकत्रयमेतदेव पवित्रं तदन्तर्धाय मधुपर्कार्थमेतत्पवित्रं निधायासनं निरीक्ष्य 'आसनम्' **इत्युक्त्वाऽऽसनेऽर्घ्यार्हमुपवेश्यार्घ्यपात्रेणै-वार्घ्यं ददाति[13]॥ ३॥**

---

१. Due to displacement of folios in orignial MS the remaining topics *viz Madhuparka* and *Samāvartana* have been wrongly copied down in M on p.528, line 3 to p.533, line 13 and in Ad on p.1030, line 12 to p.1033, line 8, and again another type of ceremonial bath after studentship on p.510, line 1 in M and p.1001, line 5 in Ad, M begins the text with 'वाधूलकाय नमः' on the top of the page. २. M Ad broken; opening line indicates the displacement of folios. ३. M गृहाच्छोभ°, Ad गृहात् शोभ°. ४. M Ad पर्क...ानान. ५. M Ad °मण्डुभि°. ६. M Ad पात्राभिः. ७-७. M Ad ...प्रोक्षण...वोत्पञ्च... अर्घ्य°. ८. M Ad °त्यान्नेन. ९. M °दकानर्थमे°; Ad °दकानर्थक°. १०. M Ad °स्मिन्...कमनी. ११. M तदर्थमनुष्य...कार्य; Ad °मनुष्यकार्य°. १२. M Ad ततः....द्धं. १३. M indicates the end of *Khaṇḍa* here.

वृत्तिः—हस्तप्रक्षालनार्थमुदकम[१]र्घ्यमित्युच्यते। न प्रक्षालनार्थम्[२], पूजार्थं तत्रानीयत इति केचित्। हस्त उदकायनं किलात्र पूजा। पाद्यं[३] पादप्रक्षालनार्थं तत्पाद्यमिति ददाति। विपरीत[४]मेके ब्रुवत इति पूर्वं पाद्यादानविधिः। ब्राह्मणो[५] यदि प्रक्षालयति तदा तस्य दक्षिणं पादं ददाति। सव्यमितरयोः राजन्यवैश्ययोः प्रक्षालयित्रोः। गृह्याः पुत्रपौत्रदाराः, अप्रत्ताश्च दुहितरो, भ्रातरश्चाविभक्तदायादाः। ते यस्मै मधुपर्कं ददति[६] तं परिवार्योपासीरन्। पूजा पूजनद्रव्याणि कांस्यादीनि। तानि दर्शयति—'इमानि पश्य' इति वर्षीयसा तेजोमयेनापिधायेति पाठान्तराद-पिधानपात्रं तेजोमयं हिरण्यरजतताम्रकांस्यादि तेज इत्युच्यते। 'देवस्य त्वा (सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता)भ्यां[७] प्रतिगृह्णामि' इत्यनेन सावित्राख्येन मन्त्रेण प्रतिगृह्णाति। प्राशनमाचम्याचम्य तत्र प्रथममन्त्रेण सकृत्। एवमितराभ्याम्। अर्हणीया या पूजनार्था[८]ऽऽनीयमाना गौस्तामानीय 'इयमर्हणीमा' इति तां पूजनीयां[९] यथातथा करोति। यदि 'असौ हत्वा मांसं कुरु मम' इत्याह तदा तां हत्वा तन्मांसवन्तमोदनं भोजयति। यदि 'उत्सृज' इत्याह तदोत्सृज्यौदनमेव भोजयति। क्रियमाणायां वर्धमानायां 'गौरस्यपहत[१०]पाप्मा' (आपमं २.१०.६) इत्यादिनाऽभिमन्त्रयते[११]। 'गौर्धेनु भव्या[१२]' (आपमं २.१०) इत्युत्सर्गपक्षे। कंसं मधुपर्कपात्रं प्रवर्तौ कुण्डले स्रड्मालालंकारे गन्धादिनियमग्रहणमेतेषामवश्यदानार्थम्[१३]। अत ऊर्ध्वमपि यथाश्रद्धं[१४] देये नियम इत्युक्तानामप्यत्र[१५] देयग्रहणान्मधुपर्कार्घ्यं समानम्॥

इति द्वितीयाध्याये नवमः खण्डः

---

१. M Ad °मर्ध°. २. M Ad °नार्थः. ३. M Ad पाद्यां. ४. Ad °परीकमे°. ५. Ad ब्रह्म°; thus M. ६. M Ad ददाति. ७. M Ad abri देवस्य = त्वाभ्यां. ८. M Ad °जनार्थान्नीय°. ९. M Ad °नीयो. १०. M Ad °स्यवहत°. ११. M Ad indicate the end of *Khaṇḍa* (—''). १२. M Ad °भवेत्यु°. १३. M Ad °मपश्यदा°. १४. M Ad °श्रद्दधेयं देये नि°. १५. M Ad °प्ययमन्दे°.

अथ द्वितीयाध्याये दशमः खण्डः

अथ स्नानम् (समावर्तनम्)

वेदमनूच्य स्नास्यन्नुपकल्पयते [१][एरकां चोपबर्हणं च नापितं च क्षुरं च पालाशीं च समिधं दारूणि चोपस्तरणं वृकलाँश्च दन्तधावनं च शीताश्चोष्णाश्चापः सर्वसुरभिपिष्टं चन्दनमहतं वासः सान्तरं च प्रावारं वादरमणिं स्वर्णपिहितं सूत्रं च प्रवर्तौ चाज्यं च दर्वीं च मालां चादर्शं चाञ्जनं च दण्डं च छत्रं चोपानहौ चानुडुहं चर्म सर्वलोहितमित्येतेऽस्य संभारा उपक्लृप्ता भवन्ति][१]॥ १॥

वृत्तिः—तत्रैरका[२] शयनार्थमास्तरणं[३] कंबलादिः। उपबर्हणं शिरोपधानम्। [४]अत्र नापितग्रह[४]णमृत्विग्वपनप्रतिषेधार्थम्। क्षुरग्रहणं पात्रसादनकालेऽस्यापि सादनार्थम्। दारूणिग्रहणेनेध्मा उच्यन्ते। ततः पाकयज्ञप्राधान्यं द्योत्यते। उपस्तरणं परिस्तरणाद्यर्थं बर्हिः। वृकलाः[५] शकलाः जिह्वाशोधनार्थाः। बहुवचनान्ततया[६] दन्तधावनकाष्ठानि शास्त्रान्तरे विहितानि। ततो ज्ञातव्यानि। कथम्—

[७]आम्रपलाशबिल्वानामपामार्गशिरीषयोः।
वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम्॥ इति॥
करञ्जकरवीराश्च पाटलिकुटजासनाः[८]।
ये चाप्येवंविधास्तेऽपि[९] शस्यन्ते दन्तधावनाः[१०]॥ इति॥
खादिरः ककुभो निम्बाः[११] कपित्थामलकार्जुनाः।
अश्वत्थश्च शिरीषश्च दन्तधावनपूजिताः॥ इति च॥

१-१. M Ad om; this *sūtra* has been reconstructed on the basis of its *Vṛtti VādhGSVR* 5.47-94, as well as *ĀgniGS* 1.3.1:18. २. M Ad तत्रेर°. ३. M Ad °मास्करणं. ४-४. M Ad नापितत्रग्रह°. ५. M Ad वृकालः. ६. M Ad °चनान्त्रया. ७. M आम्रपूला°, Ad आम्रमूलास°. ८. M Ad कुट चास°. ९. M Ad ते विशस्य°. १०. M Ad °धावनः. ११. M विम्बा, Ad निम्बा.

सर्वसुरभीत्यत्र सर्वशब्दो बहुवचनद्रव्यवाची। [१]चन्दनाञ्जनयोरपि[१] [२]पिष्ट-मित्यनुवर्तते। अहतशब्दोऽत्र नववाची[२]। सान्तरमिति बहुव्रीहिः। सहान्तरेण वर्तत इति प्रावृतारं विशेष्यते।[३] अन्तरं परिधानीयम्। अधिकारात्ते अपि वाससी एव। मणिः। मणिः पद्मरागादिः, शङ्खमणिर्वा, मयूरास्थिवातरक्षो वा। तथा वात्स्यायनीये सुभगंकरणीयेषु[४] पठितम्। [५]'मयूरस्यास्थिवातरक्षो वा सुवर्णेनावलिप्य' इति दर्शनात्। प्रवर्तौ सुवर्णमयकुण्डले। तथा चोक्तम् मानवे[६]–

वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम्।
यज्ञोपवीतं वेदं च शुभ्रे[७] रौक्मे[८] च कुण्डले॥ (मनु ४.६६) इति॥

दण्डोऽपि वैणव एव। अनेनात्रान्त इतिकरणम्। छत्राद्यनुक्तसमुच्चयार्थम्। तेन ब्रह्मचारिणः प्रतिषिद्धान्यपि रुद्धान्यस्यानुज्ञायन्ते[९]॥

[१०](**॥ प्राजापत्ये बार्हस्पत्ये भग्ये सावित्र ऐन्द्र ऐन्द्राग्ने तेषामन्यतमे नक्षत्रे स्नायात्॥ २॥**)[१०]

वृत्तिः–प्राजापत्ये जनयितृसमर्थे। बार्हस्पत्ये 'बृहस्पतिप्रसूतोऽसानि' इति। भग्ये[११] सुभगनक्षत्रे सौभाग्ययोग्ये। सावित्रेऽनुज्ञातृत्वयोग्ये। (सवितृ प्रसूतोऽसानि' इति।)[१२] [१३]ऐन्द्र ईशितृत्वे चित्रोऽसानि[१४] धान्यादिभिः॥

[१५]**(आ)पूर्यमाणपक्षे [१६]व्रजं प्रपद्येत॥ ३॥**

अन्तर्लोम्ना[१६] चर्मणा सर्वरोहितेन व्रजद्वारमवघ्नन्ति॥ ४॥

वृत्तिः–प्रच्छादयन्ति॥

तत्राग्निमुपसमाधातवा इति॥ ५॥

१-१. Ad om. २-२. Ad om, M °वर्तते...आहत°. ३. M Ad indicate the end of the *Khaṇḍa*. ४. M Ad सुभगकारि°. ५. M Ad मयूरस्य स्थितरक्षो°. ६. M Ad मा...व. ७. M Ad शुभे. ८. M Ad रौक्म. ९. M °नुज्ञायान्ते, Ad °नुज्ञयान्ते. १०. M Ad om; this *sūtra* has been reconstructed on the basis of *Vṛtti* (Ed.). ११. M Ad बृहतः परि...वभग°. १२. M Ad om. १३. M Ad ऐन्द्रं. १४. M Ad °सानि...धान्यादि°. १५. M Ad om आ. १६-१६. M Ad broken व्रजं...वा.

वृत्तिः—किमुक्तम्। अग्निमुपसमाधातुमाहेत्यर्थः। कथं? 'पूर्वार्धे [1]प्रत्यस्याग्निमुपसमाधेहि' इति, इत्येवं येनकेनचित् लौकिकेन वाक्येन॥

अनेन हरन्त्येतान् संभारान् इति॥ ६॥

वृत्तिः—अनेनान्यकर्तृत्वेन कियदतिदिश्यत इत्यत्रोच्यते। सर्वमणिमुखमिति केचित्। प्राक्परिधानादित्यपरे। पात्रसादनान्तमेवेत्यन्ये। मध्यन्दिनकालेऽह्नो[2] मध्यस्त्रिभागे। तथा होममारभेत॥

तत्र पात्रसादनकाले होमार्थानि द्वन्द्वशः सादयित्वाऽन्यान्येरकादीनि मनुष्यार्थानि सह सादयतीति॥ ७॥

तत्र समिदुदपात्रे एरकोपबर्हणे च यथोक्तं सादयित्वेतराणि युगपदुत्तरतः सादयन्ति केचित्॥ ८॥

पूर्वमुत्तरत एव सर्वाणि सादयित्वा प्रोक्ष्य समिदादीनि पुनर्यथोक्तं सादयन्त्यपरे॥[3] ९॥

वृत्तिः—पूर्वस्मिन्नपि पक्षे[4]...समित्स्थाने समावर्तनस्वामी समिधमाधायाथैरकायामित्याद्यु[-पविश्य][5]प्रतिपद्यते। उद्यमानं शिरः नापितेनोदकेनादिक्रियमाणमित्यर्थः। रोमाण्युच्यन्ते। एतस्मादिति हेतौ पञ्चमी। यस्मादित्यादिना पूर्ववाक्योक्तं गुणदूषमविदुषस्तत्फलमिति प्रतिपाद्यते। तस्मादित्यादिना गुणदोषौ विजानतः उभयाभावात् स्वेच्छातः प्रवृत्तिरुच्यते॥

'इदमहम्' **इत्ये[6]तस्मिन् मन्त्रेऽमुष्यामुष्यायणस्येत्यत्र समावर्तमानानां[7] नामगोत्रेऽपि निर्दिशति॥ १०॥**

वृत्तिः—कथम्? इदमहं देवदत्तशर्मणो वसिष्ठस्यापत्यमिति[8] वासिष्ठस्य। एवं भार्गवादीनां स्वं स्वं नाम गोत्रं च निर्दिशति। तूष्णीं जिह्वां प्रधाव्य दन्तान् प्रधावते मन्त्रेण॥

---

१. Cf *ĀgniGS* 1.3.2:3 वज्रस्याग्नि°. २. M Ad कालोह्ना. ३. M Ad indicate the end of the *Khaṇḍa*. ४. M Ad पक्षे...समित्स्था°. ५. M Ad °थेराकायामित्याद्यु...प्रति°. ६. M Ad इति त°. ७. M Ad सामावर्तमानामगो°. ८. M Ad °स्यापर्तिमित्यावा°.

दैवकर्मणि पिष्टसंयवने[१] प्रणीताभ्य आनीतासु शीतासु मदन्तीरानीयन्त इति॥ ११॥

वृत्तिः—[२]तद्याः समावर्तमानार्थमुष्णासु[२] शीता आनीयन्त इत्येतद्देवमानुषस्य व्यापृत्या इत्युच्यते। 'आपो हि ष्ठा मयोभुवः' इति तिसृभिरा[त्मानं][३] त्रिरभिषिञ्चतीत्यनुवर्तते। ततः प्रतिमन्त्रं कृत्वोऽभिषिञ्चति॥

केचिदाचम्यानुलिम्पन्ति॥ १२॥

वृत्तिः—मन्त्रलिंगादाकाशे देवता उद्दिश्य गन्धात् किंचित् निरस्य तदनुलिप्य चन्दनस्यापि समन्त्रमेवोभयं करोति। एवमेवात ऊर्ध्वमामरणात् गन्धानुलेपे सप्रसेके मन्त्रद्वयविधिः॥

अन्यस्यैतदार्द्रं वासो होमार्थमहतं वासः परिधायाचम्याथैतं मणिमित्यादि प्रतिपद्यते, अत्यग्रे प्रोतनदर्शनात्॥ १३॥

वृत्तिः—आश्वलायने पद्मरागादिमणिर्विधीयते। बौधायनीये बादरः। ततः सामर्थ्यादुभयोर्विकल्पप्रदर्शनार्थमिहैकवचनमित्य[प]रे। संभरणे प्रोतने चोभयदर्शनात्, वात्स्यायने बादरं मणिं शंखमणिं चेति। समुच्चयदर्शनाच्चोभयमलंकारार्थम्। समुदायापेक्षमेकवचनमित्यन्ये। पूर्वपक्षमस्मदीयाः केचनानुतिष्ठन्ति। केचनान्त्यं मध्यमं पक्षमनुतिष्ठन्ति, (ते)[४] न दृश्यन्ते। अयमपि पक्षोऽनुष्ठेय एव। बौधायनीये[५] चाश्वलायनीये[६] चान्यतरं विधानात्। 'मणिं कण्ठे प्रबध्य' इत्याश्वलायने दर्शनात् कण्ठे मणिं बध्नाति। केचिन्मणिबन्ध इति समाख्यानात्, वात्स्यायने दक्षिणेन हस्तेन धारयेदिति च दर्शनात्। हस्त इत्यपरे। अक्ष्णयेति ह वचनाद् यज्ञोपवीतवद् इत्यन्ये। अस्मदीयैरयं पक्षो व्याख्यायत एव नानुष्ठीयन्ते[७]। इमं पक्षं नाश्रयन्ति। अक्ष्णया-शब्दमन्यथा वर्तयन्ति। कथम्। सूत्रकमग्रमेकत्र विधायापरेणाग्रेण हस्तं कण्ठोपरिगमय्य यद्बन्धनं तदक्ष्णया-शब्देनोच्यते इति। मणिद्वयग्रहणपक्षे केचिन्मणिं कण्ठे प्रबध्य बादरं हस्ते प्रबध्नन्ति॥

---

१. M Ad °संस्रावने. २-२. तद्यावतामानार्थ°. ३. M Ad °रित्या...त्रि°. ४. M Ad om. ५. M Ad °यनी. ६. M Ad °लायनी. ७. M Ad एवानुष्ठी°.

'मम[ाग्ने वर्चो विहवेष्वस्तु०][1]; आयुष्यं वर्चस्यम्[2]' **(आश्वसं. १०.१३०.१-५) इत्येते पञ्चभि:[3] होमत्वादस्वाहाकारान्ताह्या...त षड्भि: दक्षिणा प्रावर्तं दक्षिणे कर्णे आबध्य** 'ऋतुभिस्त्वार्तवै: संवत्सरस्य धायसा तैस्त्वा संहनुकरोमि' **इत्यनेन संहनुकरोति[4]॥ १४॥**

वृत्ति:—संहनुशब्देन कुलच्छेदनस्य प्रमोचनार्थस्योभे अग्रे उच्येते[5]। संहते करोतीत्यर्थ:। तथैवोत्तरमपि समन्त्रकमेव मालां परिहरतो मणिं[6]...नेव यदे... स्वयंकर्तृ...णो[6] ज्ञायते। होमार्थमिह परिहितन्यस्य नित्यार्थं परिधायानेनैव मन्त्रेणोत्तरीयं परिधत्ते। निर्मुच्योपानहौ जयादि प्रतिपद्यते॥

[7]अथैनमुदपात्र इत्येकवचनाच्चाजेऽन्यसहत्वादेरकामपि जुह्वति केचित्॥[7] १५॥

वृत्ति:—अथैनमुदपात्र इति। अथ- शब्दग्रहणं परिप्लावनमन्त्रस्यापवो...॥[8]

इति द्वितीयाध्याये दशम: खण्ड:

---

१. M Ad मम...आयु०; cf *TaitS.* 4.7.14.1. २. cf *AV* 5.28.13. ३. M Ad पक्षे...होमत्वा दस्वाकारान्ताह्या...त. Here text is very much mutilated in both M and Ad. It is similar to *ĀgniGS.* 1.3.5 (p.22). ४. M Ad सहानु. ५. M Ad उन्वेते. ६-६. M Ad मणिं...नेव...पदे... स्वयंकर्तृ...णो text very much mutilated cf *ĀgniGS.* 1.3.5. ७-७. M Ad give the text after प्रोतनदर्शनात् (*sūtra* 13). Since 'अथैनमुदपात्र' is given after जयादि प्रतिपद्यते, I have given both together. ८. Due to displacement folios in original MS, a large text of *Ekāhas* has wrongly entered here in both M (p.533, line 14 to p.541, line 10) and Ad (p.1040, line 6 to p.1052, line 8). The text after स्यापवो (?) is broken (cf *VādhGSVR* 5.82; *ĀgniGS* 1.3.5).

अथ द्वितीयाध्याये एकादशः खण्डः

अथ इतरत् स्नानम्[1]

अथेतरदिति॥ १॥

वृत्तिः—अथेतरदित्यादि।[2] अत्र 'अथेतरत् स्नानं वक्ष्यते' इति वाक्यशेषः॥

तूष्णीमेवेति॥ २॥

वृत्तिः—तूष्णीमेवेति वाक्यान्तरम्। अनेन वपनादिचन्द्रमस उपस्थानानन्तरं[3] मणिकुण्डलसंस्कारहोमवर्जममन्त्रकं कर्म विधीयते। तस्य ब्रह्मचर्यव्रतस्योपनयनसमिदाधानं प्रायणीयम्[4]। इह समिदाधानमुदयनीयमिति[5] मन्यमानाः केचन समिदाधानमपि तूष्णीं कुर्वन्ति। अस्मिन्पक्षेऽग्निमुपसमाधाय परिस्तीर्य उत्तरतः पात्रैः सह समिधमपि सादयेत्। अन्यस्मिन् पक्षे क्वचिच्छुद्धे देशे दर्भेषूदकं मधुदधिमन्थोदनार्थानि पञ्चपात्राणि एकैकं प्रोक्षणीपात्रं च सादयेत्। उभयत्र प्रोक्षणीः[6] संस्कृत्य पात्राणि प्रोक्ष्यान्वादीनीतरतः[7] पवित्रं विनियोगक्रमेण पात्रेष्वानीय पवित्रमग्नावाक्षिपत्याचार्यः। ततः कर्तुः स्वामिसमिधमाधायानाधाय वा वपनादिः प्रतिपद्यते॥[8]

तत्र शीता उष्णाभिरद्भिः स्नात्वा तीर्थे स्नाति॥ ३॥

तत [9]उपादानादुपमोचनान्त आचार्यो [गा]मानीय[10] 'इयं गौस्तव' **इति ब्रूयात्॥ ४॥**

---

१. M Ad अथ स्नानम्। Due to displacement of folios the text dealing with another simple type of *Samāvartana*, which should have come immedistely after main *Samāvartana*, wrongly starts on p.510, line 1 in M and p.1001, line 4 in Ad after the ritual of *Upākarma* in both the Mss. The word इतरत् itself indicates that this another type of *snāna* should have come after the main *Samāvartana*. २. M Ad °दित्याद्यात्र. ३. M Ad °स्थनान्त°. ४. M प्राणीय°, thus Ad. ५. M Ad °मुदयमिति. ६. M Ad °क्षणी. ७. M Ad °न्वादीनित°. ८. M Ad indicate the end of *Khaṇḍa*. ९. M Ad उपानादुप°. १०. M Ad °चार्योमानीयोयं.

वृत्तिः—[१]स्वप्राशनमाचार्यस्यान्याय्यत्वादन्यकर्तृकं प्राशनादि स्नातकप्राशनं सर्वस्य शेषकार्यदर्शनाद्। उदकसंसृष्टाः सक्तवो मन्थाख्याः॥

अभिमन्त्रयते स्नातकः॥ ५॥

यं प्राह तस्येति पूर्ववाक्यशेष इति केचित्, उत्तरवाक्यस्येत्यपरे॥ ६॥

वृत्तिः—पूर्वस्मिन्पक्षेऽमुष्येत्यत्र यं प्राह तस्य नाम निर्दिशेदिति। शेषस्तदश्रुतं किञ्चित्कत्वं स्यादित्यन्यस्मिन् पक्षे दोषः। पक्षान्तरे [२][ब]हुत्वं तयोर्विरोध[३] इति दोषः। कुरुतेति [४]बहुवचनसमर्थनिगद इति[४] परिहर्तुं शक्यत्वादुत्तरवाक्यशेष इति युक्तम्। अस्मिन् पक्षेऽपि[५] यो गां प्राह तस्य नामामुष्येत्यस्य निर्देशयति। यः प्राहेत्यत्र वचनाद् आचार्यादन्यो यः [६]वाचयति कारयति[७] वा स लभत इति स्नातको निर्दिश्यते[८](ऽने)न ज्ञायते॥

समावर्तनादुत्तरकालमेकाकी न गच्छेद्[९] इति॥ ७॥

वृत्तिः—[१०]रातिर्दानार्थः। राति वरे[ण्यं][११] किञ्चित् दाता। तस्य वा येन अस्य स्नातकस्य समुदितं व्यवस्था कृता समावृत्ते[१२] कृते त्व[या मम गृहे आगन्तव्यं तस्य] गृहं[१२] गच्छति। तत्र गत्वा यल्लभ्यते तद् गृह्णाति॥

(स यदि)[१३] रथमारभते[१४] 'रथन्तरमसि[१५]' इत्यादि विशेषः॥ ८॥

वृत्तिः—[१६]('रथन्तरमसि' इति दक्षिणं चक्रमभिमृशति; 'बृहदसि' इत्युत्तरं, 'वामदेव्यमसि' इति)[१६] मध्यमम्[१७]। रथोपस्थं[१७] प्रवर्त्यमानं गच्छन्तम् [१८]अयं वामश्विना रथः' इति। वृथा[१८] यद्यसौ गम्यमाने पृथक्कुर्यात्, न किञ्चिद् ददाति, तदेमां [१९](भूमि)मभिमृशेत् 'मयि धृतिम्[२०]' इत्यादि॥

---

१. M Ad स्वमासन°. २. M Ad चक्षान्त...हुत्व°. ३. M Ad °रोधः. ४-४. Ad समर्थ इति निगद इति. ५. M Ad वियोगां. ६. M Ad यः...वोचनयति. ७. M कारयिता, Ad कारयतिता. ८. M Ad °तेनन. ९. M Ad गच्छेतिति. १०. M Ad रातति°. ११. M Ad वरे...कि°. १२-१२. M Ad वृत्ता कृते त्व...गृहं. १३. M Ad om. १४. M Ad रथन्तमारेभे. १५. M Ad रथन्तमसी°. १६-१६. M Ad om; cf *ĀgniGS.* 1.4.1:24.11-12. १७-१७. M मध्यं रथो° Ad मध्यस्थो°. १८-१८. M Ad रथशमरथं वृथा. १९. M Ad om. २०. M Ad धृतीरित्या°.

[इ-][1]तः स्नानं पूर्वं वेदाध्ययनस्नानमपरे[2]॥ ९॥

स यः [3]सनिमेष्यन् स्यादित्यादि॥ १०॥

वृत्तिः—सनिर्द्रव्यं तत्प्रार्थयितुं यं गच्छति तं दृष्ट्वाऽभिमन्त्रयते। आमन्त्र्यावबोध्यार्थं प्रयोजनं वदते। अर्थार्थं यं गच्छति तस्य नाम संबुध्यन्तं निर्दिशति। मन्त्रेऽस्मिन्[4] [आकर्षफ]लको[4] द्यूतफलको वा तत्र तिलान् क्षिप्तान् द्रव्यान्तराभावाद् दधिश्रयणं कृत्वा पर्यग्निमात्रं कृत्वा हस्तेन जुहुयात्। ओषध्यः सक्तव इति वचनादभिवत्स्यति[5]। आगमिष्यति वैश्यास्तृणपिण्डा[6] वृ[क्षत्वक्- पिण्डा वा] वशृगजिपत्या[6] गोशृङ्गः पतितः। सर्वौषधमनुपद उक्तम्- 'सप्त ग्राम्या ओषधयः सप्तारण्या व्रीहियव अणवो गोधूमास्तिलमाषाश्चेत्यनुत्सृज्य। कुलत्था नु हैके ब्रुवते। तथाऽऽरण्या [7]श्यामाका नीवारा गवीधुका गार्मुता[7] वास्त्वा वेणु[यवान्विता][8] इति। तादर्थ्ये चतुर्थी॥

तेभ्यो भोजनार्थममुमोदनं स्थाल्यादावुद्धृत्य त्रिः परिष्यन्दयेत् ॥ ११॥

वृत्तिः—[9]यावती मानार्थेऽमुमुद्धृत्य दत्त्वा परिष्यन्दयेत् परितः स्रावयेत्॥[9]

'शश्वत्परिकुलीनेन' **इत्यादिना मन्त्रेण तेभ्य आरभ्यात्मानं प्रतिलेख्यं लिखति॥ १२॥**

इति द्वितीयाध्याये एकादशः खण्डः

समाप्तश्च द्वितीयोऽध्यायः

—o—

---

१. M Ad इत्यादि...त स्ना°. २. M स्नानममपरे; thus Ad; both M Ad indicate the end of *Khaṇḍa*. ३. M Ad सरिमे°. ४-४. Ad °स्मि...लको; thus *VādhGVR*. 5.146. ५. M Ad अभिवत्स्यति doubtful. ६-६. M Ad विशणपिण्डावृ...वशृगजिपत्याः doubtful; cf *VādhGVR*. 5.150: जीवत्यागो पतेच्छन्नं [वतेक्ष्छृङ्ग. ७-७. M Ad माभामकानिवारागवीधूतुका गार्मुका. ८. M Ad वेणु...इति. ९-९. Due to displacement of folio the text beginning with यावती to स्रावयेत् has wrongly been copied on p.547, line 12-13 in M and on p.1063, line 4-5 in Ad. From there it has been placed here at its proper place.

अथ तृतीयाध्याये प्रथमः खण्डः

अथ विवाहः

हस्तग्रहणेऽसौ शब्दः सं[बुध्य]न्तो वा॥ १॥

वृत्तिः—हस्तग्रहणेनात्र विवाहो लक्ष्यते। तदर्थमस्मिन् कर्मणि हस्तग्रहण-विधानमिति ज्ञापयितुम्। तेन मन्त्रेण हस्तग्रहणात् पूर्वं [१]वरेणास्या हस्तो न स्प्रष्टव्यः। [२]हस्तग्रहणेन विवाहो लक्ष्यते। प्रसङ्गादन्यदुक्तं विवाह एवातः परं वक्ष्यतीति शेषः[२]॥

बाह्यतोऽग्निमिति॥ २॥

वृत्तिः—लोकाग्नेराहरणं [३]श्रोत्रियागारात्। तमाधाय संपरिस्तीर्येत्यादितन्त्रम्।[३] धान्यमौपासनस्य ख्यापयितुम्। *बाह्यतो ग्रामाग्नेः किं न वर्त्यते सूतकाग्निं समारोह्योपनयने मथित्वा तस्मिन्नुपनयने सायं प्रातः होमसमू[४]हादीनि कर्माणि कर्तव्यानीति बौधायनमतम्। तस्यानिवृत्यत्वख्यापनार्थं बाह्यत इत्याह। उत्सर्गपक्षोऽपि तत्रैवाम्नातः॥*

[५]वरः पुण्याहवाचनं कृत्वा भुक्त्वा [६]हस्त्याद्यन्यतमं वाहनमारुह्य [७]पदातिरुपानहावुपमुच्य वा वधूगृहं गच्छति॥ ३॥

ततो वध्वाः पुण्याहवाचनं कृत्वा स्वागारेण[८] तगरेण गन्धद्रव्येणेत्यादि[९]

---

१. M Ad परेण. २-२. Due to displacement of folios, the text has been wrongly copied on p.547, line 13-14 in M and on p.1063, line 5-7 in Ad. ३-३. The text beginning with 'रण' occurs on p.512, line 10 in M and on p.1005, line 8 in Ad onward. बाह्यतोग्निमिति लोकाग्नेराह... धान्यमौपासनस्य. *-*. The text is given on p.547, line 14-17 in M and p.1063, line 7-10 in Ad. ४. M Ad समाहा°. ५. M Ad give the text hereafter on p.512, line 11 and on p.1005, line 9 respectively. ६. M Ad हस्ताद्य°. ७. M Ad °रुह्यावदातिरुपदानहावुप°. ८. M Ad स्वागरे°. ९. M Ad °द्रव्ये...येत्यादि.

यथोक्तं व्याख्याय यथाशक्ति सुवर्णादिनाऽलंकृत्य वस्त्रेण तां प्रच्छाद्य शकुनसूक्तं पठद्भिः संबन्धिभिः सह [1][ता]मानाय्य पादुकाभ्यामवरोप्य[2] वरो हस्तस्योपरि हस्तमपृष्ठं धारयित्वा प्राजापत्ये विवाहे 'सहधर्मश्चर्यताम्' **इत्युक्त्वोदकं ददाति॥ ४॥**

प्राजापत्यादन्यत्र तूष्णीम्॥ ५॥

दाता पितृमातृभ्रातृमातुलानामन्यतमः॥ ६॥

अथवा स्थण्डिलं कृत्वा बाह्यतो अग्निं लोकाग्निमाहृत्य स्थण्डिले न्युप्य ज्वलयित्वा [3]पात्रसादनकाले पात्रैर्लाजानपि पात्रान्तर ओप्य सादयित्वा ॥ ७॥[4]

वृत्तिः—[5]अथ वैतानिकानवेक्ष्य बाह्यशब्देन गृह्यकर्माण्यभिहितानि गृह्यन्त इत्यर्थः। किमतिदिश्यते। उपलेपनोद्धननस्थण्डिलकरणोल्लेखनादि अगारांश्च विवाहमिच्छन्ति॥[5]

दृषदुपलौ च सादयति॥ ८॥

वृत्तिः—दृषदुपलं वोपलमेव वा॥

ततो यथोक्तमग्निमुखं परिसमाप्यावापस्थाने 'या तिरश्ची [6]निपद्यसे' **इत्येतां पुनः प्रधानार्थत्वेनान्वारब्धायां जुहोति॥ ९॥**

वृत्तिः—*अनुपहतं वस्त्रं वधूं परिधाप्य तस्यामन्वारब्धायां पुनरस्या[7]मन्वा-रब्धायामिति दर्शनात्, पूर्वस्यान्वारंभस्य कृताकृतत्वं ज्ञायते। अग्नेः प्रायश्चित्ति-मित्यादीनां प्रत्याहुतिसंस्रावं कस्मिंश्चित्पात्रे [8]अवनीय तेनान्तेऽभिघार्य अञ्जलावुपस्तीर्य स्वयमेव सकृन्मन्त्रमुक्त्वा द्विर्लाजानोप्य सकृदभिघार्य, प्रत्यनक्ति।

---

१. M Ad सह...मानाय्य. २. M Ad °मपरोप्य. ३. M पत्रसा°. ४. The text is given on p.512, line 11- in M and on p.1005, line 9- in Ad. ५-५. Text is given on p.547, line 17- p.548, line 2 in M and on p.1063, line 11-14 in Ad. ६. M Ad निवपद्य°. *-*. Text beginning with *अनुपहतं and ending with °प्रायेणोक्तम्* (next page) is given on p.548, line 2 in M and p.1063, line 14- p.1065, line 8 in Ad. Thereafter a few lines belonging to ऋतुसंवेशन is wrongly given here. ७. M Ad पुररथास्यायामन्वा°. ८. M Ad सव°.

तस्या[1] अञ्जलिना एव जुहोति। एवमेव त्रिरिति उक्तेन पर्ययेण सह उपविश्य प्राजापत्यां सौविष्टकृतीञ्च जुहोति। अष्टकास्वन्नस्यैव सौविष्टकृत्या होमदर्शन[2][प्र]माणत्वात्। लाजैः सौविष्टकृतीं च जुह्वति केचित्। तथा सति तस्या अञ्जलिरेव करणम्। सकृदवदाय द्विरभिघारणं प्रत्यञ्जनाभावश्च। स्विष्टकृता-माज्येनैवान्ये जुह्वति। अन्ये लाजानां स्विष्टकृतं 'हव्यवाहं = स्विष्टमाहुवेम' (तै.ब्रा. ३.१.३.१९) इति जुह्वति। तत्र [3]प्राप्तिश्चिन्त्या। उच्यते-बर्हिषा पाकयज्ञधर्माणां परिधींश्चानूद्य शम्या विधीयते। स्विष्टकृदपि धर्मत्वात् क्रियत इति। तथा सति सौविष्टकृत्याऽऽज्येनैव हूयते॥

अन्ये पाकयज्ञे धर्मे स्विष्टकृतं नयन्ति सौविष्टकृत्या मन्त्रे व्रतोपनयनवत्॥ १०॥

वध्वाः सप्तपदानि तूष्णीमेव॥ ११॥

वरस्योपरि तूष्णीमेव चत्वारि॥ १२॥

'ध्रुवाक्षिति'**रिति ध्रुवम्॥ १३॥**

'सप्तर्षय' **इत्यरुन्धतीम्॥ १४॥**

अथैनां स्वान् गृहानानयति॥ १५॥

वृत्तिः-अत एव ज्ञातिगृहे विवाह इति ज्ञायते। दक्षिणामुत्तरामिति हस्तभागाभिप्रायेणोक्तम्॥*

[4]'समितम्' **इति च॥ १६॥**

ततो जयादि यथोक्तम्॥ १७॥

---

१. M Ad तस्य. २. M Ad °शर्न...माण°. M Ad give the indication of close of the *Khaṇḍa*. ३. M Ad प्राप्तिं M Ad give the text 'ऋतुमतीं प्रति संविशतीति संवत्सरं न मैथुनं चरेद् इत्यादिना विकल्प्य ऋतुसंवेशन एव मन्त्रा अन्यत्र गमनं तूष्णीकं तथा च लिङ्गसामर्थ्यम्। अथवा तावन्तं कालं ब्रह्मचर्यमृतावपि नियम्यते। संवेशनमृतावेव' belonging to ऋतुसंवेशन here. This text has been shifted to its proper place in ऋतुसंवेशनम्. See fn.3 on 1.1.3. ४. Again from here the remaining text is given on p.513, line 5 in M and on p.1006, line 11 in Ad onward.

वृत्तिः—'अग्ने प्रायश्चित्ते त्वा' मित्यत्र[१] पुनरन्वारंभदर्शनात् जयादिष्वन्वारंभो नास्तीति ज्ञायते। इतः प्रभृत्याहुतीनामेव संस्रावान्। अयमित्येवमर्थोऽन्वारंभो विधिनार्थत्वेन उभयथैतासामाहुतीनां संस्रावं कस्मिंश्चित्पात्रेऽपनीयते, नाभिघारयति॥

अवाचीनपाणिनोत्तानपाणिं गृह्णाति॥ १८॥

वृत्तिः—शास्त्रान्तरे दर्शनादवाचीनपाणिना अस्या उत्तानपाणिं गृह्णाति॥

'असौ त्वमसि' [२]**इति तस्या नाम प्रथमान्तमुक्त्वोत्तरत्र** 'असौ' **आत्मनो नाम प्रथमान्तमेव निर्दिशति॥ १९॥**

वृत्तिः—अत्रात्मानमित्येकवचनदर्शनात् समुच्चयपक्षो न घटते॥

उपलं वा दृषदुपलं वोभयं वा स्थापयत्याक्रामयति॥ २०॥

वृत्तिः—ततश्चाग्नेर्दृषदुपलम्[३] आक्रमयतीति काण्डिनां गृहे यद्यस्तिवचनं तथापीहोत्तरेणाग्निमिति वचनादुत्तरस्थमेवात्मानमास्थापयति, परिक्रमणमश्मन उत्तरेण। दक्षिणेन इति केचित्॥

अस्या अञ्जलिं प्रक्षाल्य तत[४] उपस्तीर्य सकृन्मन्त्रमुक्त्वा द्विर्लाजानोप्य सकृदभिघार्य प्रत्यञ्च [५]हविरस्यास्तिष्ठन्त्या अञ्जलिनाऽपर एव[६] तिष्ठन् जुहोति॥ २१॥

वृत्तिः—केचिदत्र 'हव्यवाहं'[७] 'स्विष्टम्' इत्येताभ्यां [८]लाजास्विष्टकृतमस्या अञ्जलिनैव परेण भावयन्ति। तत्र वास्तो[स्पतीयाद्याहुतीः][९] प्रायश्चित्ताहुती-र्वारुणीश्च[१०] प्राजापत्यां च हुत्वा प्राक्स्विष्टकृतं जुहोति॥

पक्षान्तरे युक्तविमोकोत्पन्नप्रतिपत्तिकार्य इति कृत्वाऽष्टकास्वन्-स्यैव सौविष्टकृत्या होमदर्शनात्॥ २२॥

सर्वस्माद्धविष इति सर्वत्र॥ २३॥

विशेषदर्शनाच्च॥ २४॥

लाजैरेवाञ्जलिनाऽस्याः सौविष्टकृतीं जुह्वति केचित्॥ २५॥

---

१. M Ad °प्रायश्चित्तिन्नित्यत्र. २. M Ad °मसी तस्या. ३. M Ad दृषं पुत्रं आ. ४. M Ad ततो°. ५. M Ad हरिर°. ६. M एव स्ति°. ७. M °वाह:, Ad °वाहं:. ८. M Ad लाजस्वि°. ९. M Ad वास्तो...प्राय°. १०. M °रुणिश्च:.

लाजानामाज्येनावदाय[1] सौविष्टकृतीं जुहोतीति कौण्डिन्यवचनात्[2]॥ २६॥

आज्येन सहेत्यन्ये॥ २७॥

वृत्तिः—स्विष्टकृद्यागस्य प्रधानप्रतिपत्तिकार्यत्वाल्लाजानामप्रधानत्वात् प्रधानयागादूर्ध्वं होमोपान्ते तेषां होमदर्शनात् तैः प्रतिपत्तिक[होमं] [3]मार्जनान्तं पक्वहोमवर्जं परिसमापयति॥[4]

इति तृतीयाध्याये प्रथमः खण्डः

---

१. M Ad °माज्य...मवदाय. २. M Ad कौण्डिन्ये वच°. ३. M Ad °त्तिक...मार्ज. ४. M Ad give the following text after परि समापयति- 'पाकयज्ञपक्ष उक्तः। इदानीमपूर्वपक्ष उच्यते- ब्रह्मप्रणीतावर्जम् आज्य-संस्कारान्तमग्निमुखं कृत्वा आचम्य परिधीन् परिधायेध्माधानादि व्याहृतिपर्यन्तंमकृ...', This text is also found in both M and Ad on p.509 (M) and 1001 (Ad). It is not very clear whether this text belongs to *Vivāha-rite* or *Upākarma-rite* or to both.

अथ तृतीयाध्याये द्वितीयः खण्डः

अथौपासनाग्निकर्म[1]

[2][यः] [3]पाणिग्रहणादिरग्निस्तमौपासनमित्याचक्षते। तस्मिन् गृह्याणि कर्माणि क्रियन्ते। तस्यौपासनेनाहिताग्नित्वं[4], तथा [5]पार्वणेन चरुणा दर्शपूर्णमासयाजित्वं चेति॥ १॥

द्वादशाहानि विच्छिन्नः[6] पुनराधेयः[6]॥ २॥

प्रतिसंख्याय [7][वा होमान् जुहुयात्॥ ३॥

परिश्रिते उद्धत्यावोक्ष्य सिकतोपोप्ते][7] उदुम्बरशाखाभिः प्लक्षशाखाभिर्वा प्रच्छाद्य याज्ञिकात्[8] काष्ठादग्निं मथित्वा लौकिकं वाऽऽहृत्य[9] सते कृत्वा ज्वलयित्वाऽभ्यादधाति–'भूर्भुवः सुवरों३प्रतिष्ठ'[10] इति॥ ४॥

अथैनमुपसमाधाय व्याहृतिपर्यन्तं कृत्वा तिस्रस्तन्तुमतीर्जुहोति–'तन्तुं तन्वन्', '[11]उद्बु[ध्यस्वाग्ने', 'त्रयस्त्रिꣳशत्तन्तवः' इति॥ ५॥

अथ चतस्रोऽभ्यावर्तनीर्जुहोति 'अ]ग्ने[11] अङ्गिरः', 'अग्नेऽभ्यावर्तिन्', 'पुनरूर्जा', 'सह रय्या' इति॥ ६॥

एकैकशो व्याहृतिः[12] समन्ताꣳ हुत्वा 'अयाश्चाग्नेरनभिशस्तीश्च

---

१. The ritual belonging to the *Aupāsanāgnikarma* is given in M^1 on p.10, line 5, H^1 on p.17, line 1 and H^2 on p.8, line 5 onward. It is not found in M and Ad. २. M^1 H^1 H^2 om; thus *ĀgniGS* 2.7.2. ३. Cf *ĀgniGS*. °ग्रहादि° सन इत्या°. ४. Cf *ĀgniGS*. 2.7.1: °सनेनाग्निहोतृत्वं, H^1 °नानित्वं, H^2 °हिताग्निस्त्वम्. ५. H^2 °वार्वणे°; thus M^1 H^1. ६-६. H^2 विच्छिन्नपुनराधेयं. ७-७. M^1 °संख्याय... उदुम्बर°. ८. M^1 H^1 यास्त्रिकान्, H^2 °यास्त्रिकात्. ९. M^1 H^1 H^2 वावृत्य. १०. M^1 H^1 H^2 om प्रतिष्ठ; thus H^2 *ĀgniGS*. ११-११. M^1 H^1 H^2 तन्वनुद्बु...ग्ने, ...अङ्गिरो; thus *ĀgniGS*. 2.7.2:13-15. १२. M^1 H^1 °हतिंस्समन्तां, H^2 हतीस्समस्तां.

सत्यमित्त्व[१]मया असि। अयसा मनसा [२]धृतोऽयसा हव्यमूहिषेऽया नो धेहि भेषजꣳ स्वाहा' **इति॥ ७॥**

एतां मनस्वतीं प्राजापत्यां [३]स[ाप्तपतीं च हुत्वा द्वे मिन्दाहुती जुहोति– 'यन्म आत्मनो मिन्दाभूत्', 'पुनरग्निश्चक्षुरदात्' **इति]॥ ८॥**

[दशहोतारं मनसाऽनुद्रुत्य सग्रहꣳ][४] हुत्वा 'इमं मे वरुण', 'तत्त्वा यामि', 'त्वन्नो अग्ने', 'स त्वन्नो अग्ने', 'त्वमग्ने अयासि', 'प्रजापते', 'यदस्य कर्मणोऽत्यरीरिचम्[५]' **इति च॥ ९॥**

अत्रैके[५] जयाभ्यातानान् राष्ट्रभृत इत्युपजुह्वति॥ १०॥

यथा पुरस्ताद् ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्ययनमृद्धिमिति वाचयित्वा [६]प्र[सिद्ध आग्नेयः स्थालीपाकः॥ ११॥

अत्र गुरवे वरं ददाति वाससी धेनुमनड्वाहं वा॥ १२॥

यदि प्रवसेद् 'ओं भूर्भुवः सुवः' **इत्युपस्थाय प्रवसेत्।][६]॥ १३॥**

यदि प्रयायाद् व्याख्यातमात्मन्यरण्योः[७] समारोपणम्॥ १४॥

[८]अरण्योः समिधः[८] समारोपयेदरणिकल्पेन[९]॥ १५॥

यत्रान्तरा वस्येत् तस्मिन् श्रोत्रियागारादग्निमाहृत्य 'आजुह्वानः', 'उद्बुध्यस्वाग्ने' **इति द्वाभ्याम्(अवधाय परिस्तीर्य)[१०] यस्यां समिधि समारूढस्ताम[ाद[११]धाति॥ १६॥**

व्याख्यातो होमकल्पः][११]॥ १७॥

इति तृतीयाध्याये द्वितीयः खण्डः

---

१. M^1 H^1 H^2 ०मित्वम०. २. H^2 वृतो. ३. M^1 H^1 H^2 broken; cf *ĀgniGS.* 2.7.2: 108.16. ४. M^1 H^1 H^2 broken; for broken text see *ĀgniGS.* 2.7.2: 108.20. ५-५. M^1 H^1 H^2 ०रीरिचा त्रैके. ६-६. M^1 H^1 प्र...यदि; त्वा...यदि; for broken text see *ĀgniGS.* 2.7.2: 109.3-4. ७. M^1 H^1 ०द्व्यातमात्मन्यस्य समा०; thus H^2. ८-८. H^2 ०रण्योश्च समिधि. ९. M^1 H^1 H^2 ०रणीकत्वेन. १०. M^1 H^1 H^2 भ्यां पस्यां; thus *ĀgniGS.* 2.7.2: 108.19-10. ११-११. M^1 H^1 H^2 broken; Due to displacement of folio here-after the text dealing with *Pitṛmedha* wrongly occurs in M^1 H^1 H^2.

अथ तृतीयाध्याये तृतीयः खण्डः

[1]औपासनाग्निहोमपद्धतिकारिका

संशोध्य काय[मनसी][2] मैत्रमाराध्य चैकाग्निम्।
अहर्मुखे तु प्राणान् ह्यायम्य[3]ाथ सश्रद्धया॥ १॥

प्रथममाहुतयः संकल्प्य व्यवहरेत् ततः।
'तत्त' इत्यादिमन्त्रेण वदेयुः सुहृदो जनाः॥ २॥

अग्निं परिचरेत्पूर्वमौपासनमकामतः।
'दिवि जाता' इति द्वाभ्यामभिषिच्य च मार्जयेत्॥ ३॥

[4][स]मिध्य च तथा वह्निं परिषिच्य विधानतः।
आधाय व्याहृतीभिश्च चतस्रः समिधः क्रमात्॥ ४॥

उपस्थाय च[5] हव्यानि परिषिच्याथ[6] मार्जयेत्।
पर्कं दत्त्वार्त्विजं[7] दत्त्वा भोजयित्वा द्विजानपि[8]॥ ५॥

[9]'आकूतिश्चे'ति मन्त्रेण चाकूतिमथ वेदयेत्।
उद्धतानि विमायाथ कुर्यान्नान्दीमुखं ततः॥ ६॥

प्रपद्य व्युदज्याध्वर्युरुद्धत्यावोक्ष्य मन्त्रवत्।
अभ्यज्य सर्पिषा हस्तौ संभारान्संभरेत्क्रमात्॥ ७॥

---

१. Due to displacement and intermingling of folios with the MS of *VādhŚS.* the text dealing with औपासनाग्निहोमपद्धतिकारिका has been given on p.541, line 12 onward in M and on p.1053, line 9 in Ad, after the end of *Ekahas*: 'इति समाप्तः एकाहाख्यः काण्ड' : which forms the part of *VādhŚS.* This text *Aupāsanāgnihoma-paddhatikarika* is not found in M^1 H^1 H^2. २. M Ad संशोध्यकाय...मैत्रं आ°. ३. M Ad °यम्य...श्रः श्रद्धा. ४. M Ad ...मिध्य. ५. M Ad om. ६. M Ad °षिच्य om अथ. ७. M Ad °त्विजो. ८. M Ad द्विजादीनपि. ९. M Ad आतत्यश्चास्ति.

'वैश्वानरा' दिभिर्मन्त्रैः पार्थिवान् त्रिस्त्रिराहरेत्।
वानस्पत्यान्[१] सकृन्नात्र मन्त्रावृत्तिर्विनाम्बुजम्॥ ८॥

[२]पालाशमरणीं चापि द्वाभ्यांद्वाभ्यां समाहरेत्।
[३]वेद्यां न्यस्तान्सतेऽभ्यक्तं चेति सह संभरेत्॥ ९॥

उदपात्रैः पयःपात्रैः संभृतस्यार्घ्यमाहरेत्।
दश षट् सप्त चतस्रः पञ्च चादाय शर्कराः॥ १०॥

दध्ना मधुयुतेनाक्तास्ताभिरायतनानि तु।
प्रसलैः परि चित्वा तु स्वामी भोजनमाचरेत्॥ ११॥

ततो 'वपा'दिमन्त्रेण केशान्प्रवपते[४] सायम्।
स्नात्वा च नवनीतेन [५]त्वभ्यञ्ज्याज्यं च चक्षुषी॥ १२॥ [१]

वापयित्वा तृणैस्तूष्णीमाचमय्य समन्त्रकम्।
'पवमाना'नुवाकेन मार्जयित्वा चतुष्पथे॥ १३॥

उदपात्रं परिस्तीर्य तस्मिन्विनिधिवाचनम्।
कृत्वा गत्वा [६]निश्यामात्यं शोभयित्वा यथाविधि॥ १४॥

परिधीनां निधानान्ते वाससाऽऽच्छाद्य बान्धवान्[७]।
कृत्वा चाग्निमुखं कर्म कुर्यादामात्यहोमिकम्॥ १५॥

'यद् देवा' दशहोता च व्यस्ता व्याहृतयस्तथा।
अभ्यावर्त्यो जयादीनि कूष्माण्ड्यः पुनरेव[८] च॥ १६॥

प्राजापत्यां च हुत्वाऽऽज्यमवशिष्यानुवित्तये।
उपतिष्ठेत होमान्ते 'पवमान' इति स्थितिः॥ १७॥

यद्वा यज्वैव 'यद्देवा' इत्यादि जुहुयात्ततः।
उद्धृत्यामात्यमर्धं वा दक्षिणाग्न्युद्धते क्षिपेत्॥ १८॥

---

१. M Ad °स्पत्या. २. Ad पला°. ३. M Ad वेद्या. ४. M Ad wrongly indicate the end of *Khaṇḍa*. ५. M Ad त्वद्भ्यांयां ज्याज्यं. ६. Ad निमा°. ७. बाद्धवान्? doubtful. ८. M Ad पुनरव.

ततो[1]पवसथिकान्दद्यात्पितृयज्ञमथापि वा।
पाने दधि [प]यो[2] वापि य'त्पितृभ्यः स्वधा नमः'॥ १९॥

अनेन हुत्वोपाकुर्यान्मांसलाङ्ग[3]मजं तु वा।
पशुः पिष्टपशुर्वापि चरुर्वाऽथ परिग्रहः॥ २०॥

शतैर्वैभीतकैरक्षैः पिता पुत्रैर्दीव्यादिति[4]।
अष्टावक्षान् पिता[5] दद्याच्चतुरश्चतुरः सुताः॥ २१॥

ज्येष्ठाय चतुरो दद्यात् स तृतीयाय तानपि।
सोऽपि चान्येभ्य एवं त्रिः कृतमित्यवते ब्रुवन्॥ २२॥

जयन्तोऽथ वदेयुस्ते 'जिता गौरि'**ति मन्त्रकम्।**
पूर्वापराग्निसंबन्धो[6] मन्त्राणां लुप्तिरिष्यते॥ २३॥

अञ्जनाभ्यञ्जने चैव दद्यात्प्रत्यवदानकम्।
अनुविक्तिं ततो हुत्वा ब्रह्मौदनमथारभेत्॥ २४॥

शूर्पं च चमसं [7]चर्म पात्रीं च स्थालसंज्ञिताम्।
[8]चरुस्थालीं च दर्वीं चोलूखलमुसलं तथा॥ २५॥

आज्यस्थालीं स्रुवं चैव समिच्छल्कौ[9] हिरण्मयौ।
प्रोक्षणीपात्रमेतानि द्वन्द्वानि तु ह वा क्षिपेत्॥ २६॥

ब्रह्मौदनाज्य उत्पन्न आमात्याज्यमथानयेत्[10]।
ब्रह्मौदनमुपस्थाय 'प्रवेधस' इति त्वतः॥ २७॥

आसित्वा परितः[11] सर्वे चत्वारोऽथ महर्त्विजः।
'ब्रह्मन् हुतमसी'**त्याद्यैः प्राश्याचम्य प्रशंसनम्॥ २८॥**

---

१. M Ad तत्रो°. २. M Ad om प. ३. M Ad °लाङ्गाम°. ४. M Ad दीव्यदिति. ५. M Ad °न्विता. ६. M Ad °बन्ध. ७. M Ad च चर्म. ८. M Ad चस्था°. ९. M Ad समिश्चत्कौ. १०. M Ad indicate the end of *khaṇḍa*. ११. M Ad परित्वस्स°.

शिष्टौ ह्यध्वर्युणा स्वामी प्रेष्य च ब्राह्मणानिति।
'मही [1]विश्वपत्न्य'**द्यौस्तु चतुर्भिररणिं हरेत्॥ २९॥**

स्त्रंसेत्[2] प्रमादाच्चेत् सावित्रेणा[3]हरेत् पुनः।
'अनृतात्सत्यमि'**त्युक्त्वा यच्छेतां दंपती[4] वचः॥ ३०॥**

'शल्कैरग्निमि'**ति चोक्त्वा शल्कैरिन्धीत शर्वरीम्।**
अध्वर्युराज्य उत्पन्ने ब्रह्मौदनिकमानयेत्॥ ३१॥

'सं वः' 'संयाव' **इत्याभ्यां संभारान्संयुयात्सह।**
भस्मादीनुषपर्यन्तानुद्धतेष्वावपेत्क्रमात्[5] ॥ ३२॥

संभारानुद्धते न्युप्तान् 'कल्पेतामि'**ति कल्पयेत्।**
शल्कं निधायोदीचीनं प्राञ्चौ कूर्चौ तयोरपि॥ ३३॥

'दिवस्त्वे'**त्यधरासाद्य [6]प्रत्यग्योनी चोदक्छिरा[6]।**
'अजीजनन्नि'**ति स्वामी जातमग्निमथारभेत्॥ ३४॥**

अरण्यादानमारभ्य सर्वं स्वामिन एव तु।
प्रागग्निग्रहणादूर्ध्वमध्वर्योरभिमन्त्रणात् ॥ ३५॥

आत्माभिवर्तनं[7] केचिद्याजमानं प्रचक्षते।
अञ्जलिस्थमभिप्राण्य संभारेष्वावपेत्ततः[8]॥ ३६॥

आधानाद् यजमानस्य पत्न्याधानमनन्तरम्।
ऊर्ध्वं गोमयमादध्यात् साज्यं सर्वौषधीरथ॥ ३७॥

'ओषध्य[9][: संवदन्ते'**ति गा]येत्साम रथन्तरम्।**
सति चासति च गान उपतिष्ठेत योनिभिः॥ ३८॥

'**प्राची 'मिति हरेर्जानोर्नाभेर' न्वग्नि 'रित्यृचा।**
मात्रे तु 'विक्रमस्वे'**ति ग्रीवायाः क्रमशो हरेत्॥ ३९॥**

---

१. M Ad विशस्पत्न्युगाद्यै° पत्न्युबाद्यै°. २. M Ad स्त्रंसे. ३. M Ad सापित्रे°. ४. M Ad दम्पनीं. ५. M Ad वपेत्। क्रमात्. ६-६. M Ad प्रत्यग्यो नीचोदर्कच्छिरा. ७. M Ad °वर्तन. ८. M Ad °ष्वापत्ततः. ९. M Ad ओषध्य...येत्साम.

स्वामिनः प्रथमः प्रैषो[1] द्वितीये च कमण्डलोः।
पुरस्तात्प्रत्यगाधानमुदगावृत्त एव वा॥ ४०॥

पूर्वेणाहवनीयं तु सभ्योपवसथिकौ[2] यदि।
आधानं तु तयोरेव [3]व्याहृतिभिर्विकल्प्यते[3]॥ ४१॥

उपस्थानानि सर्वाणि.....र्तैः।[4]
कृत्वा नमस्कारमथोत्करेऽद्भिः प्रक्षाल्य हस्तौ प्रविशेदथो च॥ ४२॥[5]

इति [१]

हविषां सुवनीयानां संपत्तिप्रक्रिया स्फुटम्।
सह निर्वापपक्षेण यथातत्त्वं निर्दिश्यते॥ ४३॥

.....।
.....[6]भर्जनायामम्बरीषकम् ॥ ४४॥

अग्निहोत्रहवण्यादीन्यष्टावपि[7] च मेक्षणम्।
स्रुचञ्चानाज्यसंसृष्टां पयस्यावाचीनमपि॥ ४५॥

पिष्टसंयवनीं[8] पात्रीं वाजिनोद्धरणाय च।
[9]दारु हेम च वर्तेते शूर्पात्किञ्चिन्निरसनम्[9]॥ ४६॥

सह षट्त्रिंशन्निर्वपेन्मुष्टिं[10] निषादयेत्पृथक्।
पृथक्शालामुखीयस्य निधेया व्रीहयो यवाः॥ ४७॥

प्रणीयापः समानीय पवित्रे मार्जयेत्करौ।
वर्जयित्वा चरुस्थालीं निष्टपेद्[11] द्वयमेव तु॥ ४८॥

---

१. M Ad प्रेषो. २. M Ad सभ्यत्वसथिकौ. ३-३. M Ad व्यावृतिभिर्विकंकत्वे. ४. M Ad broken. ५. M Ad indicate the end of *khaṇḍa*. ६. M Ad broken. ७. M Ad °दीनि अष्टा°. ८. M Ad °यपनीं. ९-९. M Ad दारुपाहेमवर्तते च धूर्मकिञ्चिन्निसनं doubtful. १०. M Ad मुष्टिन्य साद°. ११. M Ad °पे द्वय°.

मन्त्रस्त्वावर्तते तावच्छूर्पद्वयप्रवर्तने[१]।
षट्त्रिꣳशन्निर्वपेन्मुष्टीन्[२] यवानां प्रथमं पुनः॥ ४९॥
निर्वपेद् द्वादश[३] व्रैहानिन्द्रः सर्वेषु देवता॥ ५०॥
प्रतिमुष्ट्यनुषक्तव्यो मन्त्रः सावित्रसंज्ञकः[४]।
वाचनं सकृदेव स्याद् भेदेनाभिमृशेद् द्वयम्[५]॥ ५१॥
सꣳस्कृत्य प्रोक्षणीः [६]प्रोक्षेद्धविःपात्राण्यशेषतः।
आपरावपनात्कृत्वा यवानां प्रथमं ततः॥ ५२॥
मुष्ट्यावपनमारभ्य व्रीहीणामवधेः[७] स्थितः।
प्रैषमुद्वादनं चापि वर्जयित्वा ततो द्वयोः॥ ५३॥
तुषोपवपनं तन्त्रं व्रीहीणां पुनरेव च।
विवेचनादथारभ्य [८]त्रिफलीकरणं ततः॥ ५४॥
कृत्वा कपालमपरे[९] प्रथमेनाम्बरीषकम्।
अधिश्रित्योपदध्याच्च कपालानि यथाविधि॥ ५५॥
पात्रं चापि [१०]पयस्याया अधिश्रित्यानयेत्पयः[११]।
'घर्मा'दिमन्त्रमूहित्वा त्वम्बरीषे यवं क्षिपेत्॥ ५६॥
क्षिप्तानां लोधये[१२] 'अम्यङ्'मन्त्रेणार्वादिना तथा।
भर्जयित्वा यवान् फुल्लान् धानार्थं विसृजेत्पृथक्॥ ५७॥
[१३]यथाभागा'दिमन्त्रेण सोहेनान्यास्तु चूर्णयेत्।
पिष्ट्वा पूर्वं यवान् सम्यक् पश्चात्पिंशेत्तु[१४] तण्डुलान्॥ ५८॥

---

१. M Ad wrongly repeat शूर्पद्वय परिहेआवर्तते च धूर्म किञ्चिन्निरसनं सह. २. M मुष्टिन्यवनां. ३. M Ad °र्वपेद्वादशे दशे. ४. M Ad °संज्ञकं. ५. M मृशेद्वयं; Ad °नापिमृ°. ६. M Ad प्रोक्षद्व°. ७. M Ad °वधे स्थि°. ८. M Ad त्रिष्फली°. ९. M °मपरे...ण, Ad °मपरेण. १०. M Ad वय°. ११. M Ad °श्रित्य आन°. १२. Ad लाघवे, M लोधये. १३. *ĀpŚ* 1.24.5. १४. M Ad पिंक्षेत्तुं.

ओपलोद्धानतस्तन्तू[१] द्वयोः कुर्यात् समन्त्रकम्।
चतुर्मुष्ट्यधिकोपाधिभेदेन[२] त्वाहुर्वीक्षणात्॥ ५९॥
प्रणीता विनियोक्तव्याः[३] सर्वसंयवने[४] ततः।
पिण्डं कृत्वा ततः सक्तून्पृथक् कुर्यात्समन्त्रकम्॥ ६०॥
संयावार्थास्ततः सक्तून् कुर्यादाज्येन मिश्रितान्।
अधिश्रित्य पुरोडाशान् कृत्वाऽऽमिक्षां च यत्नतः॥ ६१॥
हवींषि सह सर्वाणि कुर्यात्पर्यग्निमावृतः।
अप्यनिनयनान्तोऽथ पवित्रे [५]प्रस्तरे सृजेत्॥ ६२॥
अप्यनिनयनं चापि वेद्यां प्राग्वंश एव तु॥ ६३॥ इति [२][६]
आदाय वत्सानपनीय वत्सान् संभृत्य निष्प्रस्तरमेव बर्हिः।
दुग्ध्वा पयः सम्यगावृतैरेव[७] द्वन्द्वानि पात्राणि (तु)[८] सादयेच्च॥ ६४॥
तीर्थं स्रुवं स्फ्यं च तथाज्यपात्रं काꣳस्यं चमसं तथैडां (च)[९] स्थालीम्।
पयस्याच नीयमथान्यत्पात्रं तथा वाजिनसंप्रयुक्तम्[१०]॥ ६५॥
तूष्णीं पथा ब्रह्मणि सं प्रविष्टे[११] प्रैषार्धमुक्त्वा परिमृज्य पाणी।
उत्पूय चापस्त्रिरवोक्ष्य पात्राण्युक्त्वा तु पदं 'परिवासये'ति॥ ६६॥
कृत्वा पयस्यां च निरुप्याज्यं पर्यग्निकुर्यादुभयं सहैव।
[१२]प्रैषं न चार्वाक्करणीयमग्निं प्रैषं[१३] [समि]दिध्मपदं विहाय॥ ६७॥
अर्वागथाज्यग्रहणादृजु स्यादाज्यं गृहीतं तथा ध्रुवायाम्।
बहु ध्रुवायां हविषामथाज्यैर्यागो यदि स्यादथ देविकानाम्॥ ६८॥
'कृष्णोऽसि' [१४]मन्त्रं परिवर्ज्य सर्वमृज्वानि धानात्परिधित्रयस्य।
बैदालकान् केचन कुर्वतेऽत्र युक्त्वाग्निमासाद्य तथा स्रुचश्च॥ ६९॥

---

१. M Ad ०लोद्धानस्ततस्तन्तू. २. M Ad One syllable seems to be missing in the Ist pāda. ३. M Ad ०योक्तव्यः. ४. M Ad सर्व...संय०. ५. M पवित्रेपस्तरे. ६. M Ad indicate the end of the *Khaṇḍa* by॥ इति. ७. M ०वृतैव, Ad ०वृतैरेव. ८. M Ad om. ९. M Ad om. १०. M Ad वचनी०. ११. M Ad ०विष्टै. १२. M Ad प्रैष. १३. M Ad प्रैष...दिध्म्०. १४. *TaitS.* 1.1.11.1.

आमिक्षामथ विधिनैव काꣳस्यपात्र्यामुद्वास्य क्वचिदपिधाय।
वाजिनं [१]चासन्नां समभिमृशेत्स्वयं च यज्ञः कर्तुश्च व्रतं [च]॥ ७०॥

अभीष्टमत्र सद्भिर्हविः स्रुचश्चाभिमृशेत्क्रमेण ब्रूयाच्चतुः।
होतारमथो दशाख्यमिष्ट्वा पयस्याथ साज्यभागाꣳश्च कुर्यात्॥ ७१॥

अथ देविकानां मैत्रावरुण्यो[२]ऽङ्गानि सर्वाणि समानि विद्यात्।
इडान्तमेतच्च समाप्य कर्म यजेत्तथाविधं[३] च वाजिनं च॥ ७२॥

इति [३][४]

इति तृतीयाध्याये तृतीयः खण्डः

---

१. M Ad च आस. २. M Ad repeat अथदैविकानां after ०वरुण्यः.
३. M Ad ०विध्यं. ४. M Ad indicate the end of the *Khaṇḍa*.

अथ तृतीयाध्याये चतुर्थः खण्डः

शुल्बकारिका[1]

[2]आहितेष्वग्निषु प्राञ्चं प्रक्रमेष्वष्टसु द्विजः।
कुर्यादाहवनीयं तु शालायां द्वादशे स्फुटम्॥ १॥

अग्न्यगारगतं[3] तावदन्वाहार्यस्थितिं शृणु।
प्रमाणं पञ्चधा कृत्वा षष्ठं भागमथावपेत्॥ २॥

तत्पुनः पञ्चधा कृत्वा [4]त्रीन्पूर्वे द्वे तु पश्चिमे।
अरत्निरेव सर्वेषामग्नीनां तेज उच्यते॥ ३॥

चतुः[5]स्रक्तिर्भवेत्पूर्वो वर्त्तुलः[6] पश्चिमे भवेत्।
अर्धचन्द्र इवाहार्यपचनस्तावदुच्यते[7]॥ ४॥

इति तृतीयाध्याये चतुर्थः खण्डः

समाप्तश्च तृतीयोऽध्यायः

—o—

---

१. M Ad do not give the title. २. M अहि°; thus Ad. ३. M Ad °गारागतं. ४. M Ad त्रीं पू°. ५. M Ad चतुस्र°. ६. M वत्तुलः. ७. M Ad इवाहन्यपयस्ता°. Here the text of *Śulbakārikā* is incomplete. The remaining text of the *Śulbakārikā* is not found in any of the available MSS (M, Ad). Due to displacement of folios the text following this *kārikā* on p.547, line 13 in M and p.1063, line 5 in Ad belong to *Snāna* and *Vivāha.* see fn 9-9 p.45 and fn. 2-2 p. 46.

अथ चतुर्थाध्याये प्रथमः खण्डः

अथ पितृमेधसूत्रम्

[मृत्युपूर्वलक्षणानि तन्निवृत्यर्थशान्तिकर्माणि][1]

(यदि दर्पणादावुपाधौ स्वौ)[2] चाक्षुषौ[3] पुरुषौ न दृश्येयातां प्रेत इति संविद्यात्॥ १॥

यस्याशीर्षकाविव स्यातां, [4]यस्य वक्त्रावसाविव स्यातां[4], यस्य तिर्यञ्चाविव[5] स्यातां, यस्य न प्रतीयेयाताम्[6]॥ २॥

अथ यस्य कनीयस्यात्मानं च्छाया स्याद्, [7]यस्याशीर्षकाविव स्याद्, यस्यावात्वशि[8]..[स्या]द्, यस्य च्छाया[9] न स्याद्॥ ३॥

अथ सेनयोर्विजानीयाद् [10]यतरेषां छाया आदित्यं प्रतिपरेयुस्तान् विद्यात् [11]पराजेष्यन्त इति॥ ४॥

यस्येदमङ्गुल्यग्रꣳ सदृशमेव गृहीतञ्चा[12]गृहीतं च स्याद्, यस्येदं महदुक्थं न शस्येत, यस्य तण्डुलः [13]सर्पेद्, यस्य[13] वर्षासु [अवगतास्वपि तमोवृतं

---

१. The text dealing with the syndromes of death and the rites to be performed to ward off death and for prolonging life is found in M^1 from p.10, line 20, H^1 p.18, line 13 and H^2 p.8, line 25 onward. The *VādhGVR* deals with the topic under *Āyuṣyacarvākhyakarma* (2.225-246). २. M^1 H^1 H^2 om; cf *VādhGVR* 2.227. ३. M^1 H^1 मे चाक्षुषो पुरुषो; thus H^2. ४-४. M^1 H^1 H^2 ०स्यावाक्लृप्तिरसा०, H^2 om. ५. M^2 ०निव. ६. M^1 H^1 प्रतिसयेया०; thus H^2. ७. M^1 H^1 द्यास्य०; thus H^2. ८. M^1 H^1 ०वात्वशि...द् H^2 ०वान्शि...द्, text broken, doutful. ९. H^2 ०शायान. १० M^1 H^1 इतरे०, H^2 ०यतरे०. ११. M^1 H^1 M^2 ०द्यात्वराजे०. १२. M^1 H^1 M^2 ०तन्त्वा. १३-१३. M^1 H^1 H^2 ०र्पेद्यो.

वस्तु स्याद्, अथ यद्][1] इव[2] विपरीयुः, यः स्वप्ने मर्कटं पश्येद्, अथैनमास्कन्देद्, यꣳ स्वप्ने बद्धमिव कर्षेयुः, अथ पाशौ न छिद्येत, अरुन्धतीं न पश्येत्, जीवन्तीं न पश्येद्, योऽय इवाद्याद्, यो लोहमिवाद्याद्, यो लोहितमिवाद्याद्, दधिशराव इवास्मा आदित्यो दृश्यते[2], एतं[3] शशं चान्द्रमसं प्राङ्मुखं वा[4] दक्षिणामुखं वा [5]प्रत्यङ्मुखं वा[5] पश्येद् उदङ्मुख एष भवति॥ ५॥

प्लाक्षस्य प्रस्त्रवणस्योदक् प्रादेशमात्रे मूलात् [6]तद् दिवो[6] हृदयम्; अथास्यै हृदयं यददश्चन्द्रमसि कृष्णम्। स यो ह वा एवमेते [7][द्यावा-पृथिव्योर्हृदये वेद न ह साम्यायुषो][7] म्रियते॥ ६॥

अग्नेर्ह वा एतद् हृदयं यदसावादित्यः। तद् य एवं वेद न हैनं पौरुषो वध ऋच्छति॥ ७॥

वायोर्ह वा एतद् हृदयं यदसौ चन्द्रमाः। तद्य[8] एवं वेद न हैनमशनिर्हन्ति॥ ८॥

[पुरुषशरीरे देवतानामध्यात्मस्वरूपम्]

प्रजापतिः पुरुषमसृजत। तꣳ सृष्टं देवताभिरावेशया[9]ञ्चकार [10]वा[च्यग्निं, प्राणे वायुं, चक्षुष्यादित्यं, श्रोत्रे दिशः, मनसि] चन्द्रमसं[10], रेतस्यपो[11], [12]लोमष्वोषधिवनस्पतीन्, शरीरे पृथिवीं[13], मूर्ध्नि पर्जन्यं, बल इन्द्रं, मन्यावीशानम्, आत्मन्यात्मानम्॥ ९॥

स वा एष पुरुष एताभिर्देवताभिराविष्टो [14]यथा कुम्भः कर्मणि पिन्वमानस्तिष्ठते [एवं]तस्थौ[14]॥ १०॥

---

१. M[1] H[1] H[2] broken. २-२. M[1] H[1] broken; thus H[2]. ३. H[2] om. ४. H[1] om; thus M[1] H[2]. ५-५. M[1] H[1] om; thus H[2]. ६-६. M[1] H[1] तदिवो; thus H[2]. ७-७. M[1] H[1] broken; मेते...म्रियते, [H[2] ...ते०]. ८. H[2] तस्य; thus M[1] H[1]. ९. M[1] H[1] ०रापेश०. १०-१०. M[1] प...चन्द्रमसं, H[1] प्र...मसं, H[2] प...ब्रूमसं. ११. M[1] H[1] एतस्यापो; thus H[2]. १२. M[1] लोमस्त्वो, H[1] लोमषधि, H[2] लोमस्वो. १३. M[1] H[1] H[2] ०थिवी. १४-१४. M[1] H[1] कुम्भक० तिष्ठते...तिष्ठन्ति, H[2] राविष्टो...तिस्ता.

अथ हेमा वा एता देवता [1][ईक्षाञ्चक्रिरे 'किमयमस्माभिः पुरुषः करिष्यति, किं वा वयमनेन। हन्तास्माच्छरीराद् उत्क्रमाम' इति। ता होच्चक्रमुः॥ ११॥

अथ हेदं शरीरं रिक्तमिव परिसुषिरम्॥ १२॥

स हेक्षाञ्चक्रे प्रजापतिः रन्ध्राय न क्षमम्। हन्ताहम् इमा अशनायापिपासाभ्याम् उपसृजा इति। ता होपसृजे][1]॥ १३॥

ता अशनायापिपासाभ्यामन्वसृष्टास्तमेवाच्छायन्। वाङ् [2][ममे]त्यग्निरब्रवीत्; प्राणो ममेति वायुरब्रवीत्; चक्षुर्ममेत्यादित्योऽब्रवीत्; श्रोत्रमस्माकमिति दिशोऽब्रुवन्; मनो ममेति चन्द्रमा अब्रवीत्; रेतोऽस्माकमित्यापोऽब्रुवन्; लोमान्यस्माकमित्योषधिवनस्पतयोऽब्रुवन्; शरीरं ममेति][2] पृथिव्यब्रवीत्[3]; [4]मूर्धा ममेति[4] पर्जन्योऽब्रवीत्; बलं[5] ममेतीन्द्रोऽब्रवीत्; मन्युर्ममेतीशानोऽब्रवीत्; [6]आत्मा ममेति[6] आत्माऽब्रवीत्॥ १४॥

स वा एष पुरुष एताभिर्देवता[7]भिराविष्टो यथा वृक्ष आ[र्द्र उपसिक्तमूलस्तिष्ठेदेवं हैव स तस्थौ][7]॥ १५॥

१-१. M^1 The text is badly damaged. M^1 H^1 तं वा एता देवता...प्रजापतिः; Here I have tried to reconstruct the text on the basis of *Śāṅkhā* 11.1. २-२. M^1 वाङ्...त्याग्निं ब्रवीति, H^1 वाङ्...ब्रवीति, H^2 वात्य...पृथिवी. After the reconstructed text beginning with प्राणो and ending with ममेति, the remaining text, due to displacement of folios, has been given in M^1 on p.15, line 5. H^1 gives the remaning text beginning with 'पृथिवी ममे' on p.2, line 14 onward. This displacement of folios has been indicated in the marginalia note on p.12 as under: 'अत्र ग्रन्थपातेन प्रमादः अतः ब्रवीत्यतः परं किञ्चित् ग्रन्थपातः। ततश्च १५ भागे (२) इति चिह्नित स्थलपर्यन्तं प्रकृतोपयुक्तो वाचनीयः अनन्तरं अस्मिन् १२ भागे ८ पंक्तिर्योजयितव्या, अनन्तरं १७ भागे २० पंक्तेः प्रकृतः'। Again in marginalia note on p.15 in M^1 it has been mentioned: '१२ भागेऽग्निं ब्रवीतीत्यनेन वाक्येन योजनीयः अष्टमप-ौ'. ३. M^1 H^1 पृथिव्यब्रन्मू°; In H^2 the text is at its proper place on p.10, line 5 onward. Here there is no displacement. ४-४. H^2 मृर्धाब्रवीन्ममेति. ५. M^1 बलमुमेती°; thus H^2. ६-६. M^1 H^1 om; thus H^2. ७-७. M^1 H^1 broken; H^2 broken after °भिरा; for reconstructed text see *Śāṅkhā* 11.2.

[1] **[अथायं पुरुषः प्रेष्यन् पुरा संवत्सरात् संवत्सरस्य दृष्टीः पश्यति। छिद्रा छाया भवति न वा भवति। महामेघे] मरीचीश्च[1] पश्यत्या[2]तपती-हैनान्[3] पश्यत्यमेघे[3], सकृदेव विद्योतमानां[4] पश्यति, [5]अभ्र हैनां न पश्यति[5], लोहितायन्त[6]माकाशमनुवीक्षते लोहिताष्ठी[7]लाम्बमिति। इति नु प्रत्यक्षम्॥ १६॥**

अथ स्वप्न आशु वात एनमभिवहति, दवं[8] दह्यमानं पश्यति[9] कृष्ण[दन्तं कृष्णं पुरुषं पश्यति, स एनं हन्ति, वराह एनं हन्ति, मर्कट एनं हन्ति, विसानि खादयति, सुवर्णं भक्षयित्वाऽवगिरति, एकं पौण्डरीकं धा]रयति[9]॥ १७॥

[10]स यदेता[10] दृष्टीः पश्येद् आज्यमाहरँस्त्रिफली[11]कृताँस्तण्डुलाना-हरन्[12] न मे प्रायणमस्तीति विद्यात्॥ १८॥

[म्रियमाणपुरुषनिमित्तकर्माणि]

अथामात्यमुपसमाधाय शोभयित्वा बर्हिषा परिस्तीर्य स्थालीमधिश्रित्य तिरःपवित्रमस्यामपो वा पयो वाऽऽनीय तिरःपवित्रमेव तण्डुला[नावाप्योप-स्तीर्य कꣳसादौ च्छायादर्शनयोग्ये][13] कृत्वा[14]भिघार्योद्वास्य पुनरभिघार-यति॥ १९॥

अथाप[15] आचामति। पुरुष एव मणिः॥ २०॥

पुरुष एव मणिः। प्राणः सूत्रम्। 'तस्य पुरुषस्य[16] मणेः प्राणेन सूत्रेण ग्रन्थिं ग्रथ्नाम्यनकाममाराय मह्यं मह्यमनकाममाराय' **इति॥ २१॥**

१-१. M[1] H[1] broken before °रिचीश्च and मरीची in H[2]; cf *ŚāṅkhĀ* 11.2. २. M[1] श्यात्यात°; thus H[2]. ३-३. M[1] °नानप°, H[1] H[2] °नानाप°. ४. H[2] °मानानां°; thus M[1] H[1]. ५-५. M[1] H[1] अथहैनानपश्यति°, H[2] अथ हैनाना; thus *ŚāṅkhĀ* 11.2. ६. H[2] °यान्त°. ७. M[1] H[1] °लाम्ब°, H[2] °लम्ब°. ८. M[1] H[1] दपन्°; thus H[2]. ९-९. M[1] broken कृष्ण...रयति [M[1] H[1] रति], H[2] broken after °मान; cf *ŚāṅkhĀ* 11.4; *VādhGVR* 2.235. १०-१०. H[2] broken; thus M[1] H[1]. ११. M[1] °माहरा त्रिःफली, H[2] °हरं °त्रिष्वपीकृ°. १२. M[1] °हरन मे. १३. M[1] H[1] H[2] broken; cf *VādhGVR* 2.239-40. १४. H[2] हुत्वा°. १५. H[2] °थाचाम°. १६. M[1] पुरुषस्य twice; thus H[2].

अथ परिषिञ्चति-'अदिते[1][ऽनुमन्यस्व' **इति दक्षिणतः**; 'अनुमतेऽनुमन्यस्व' **इति पश्चात्**; 'सरस्वतेऽनुमन्यस्व' **इत्युत्तरतः**; 'देव सवितः प्रसुव' **इति समन्ततः**][1]॥ २२॥

[2][**आ]घारावाघारयति।] आ**[2]**ज्येन पुरस्ताज्जुहोति**- 'वाचि मेऽग्निं[3] जुहोमि स्वाहा'; 'प्राणे[4] मे वायुं[5] जुहोमि स्वाहा'; 'चक्षुषि[6] म आदित्यं जुहोमि स्वाहा'; 'श्रोत्रे मे दिशो जुहोमि स्वाहा'; 'मनसि मे चन्द्रमसं जुहोमि स्वाहा'; 'रेतसि म अपो[7] जुहोमि स्वाहा'; ['लोमस्वोषधिवनस्पतीन् जु][8]होमि स्वाहा'; 'शरीरे मे पृथिवीं जुहोमि स्वाहा'; 'मूर्ध्नि मे पर्जन्यं जुहोमि स्वाहा'; 'बले म इन्द्रं जुहोमि स्वाहा'; 'मन्यौ म ईशानं जुहोमि स्वाहा'; 'आत्मनि म आत्मानं जुहोमि स्वाहा' **इति**॥ २३॥

॥ **अथैतस्य स्थालीपाकस्योपस्तीर्णाभिघारिताञ्जुहोति**–'अग्निर्मे वाचि श्रितः[9] वाग् हृदये हृदयं मयि। अहममृते[9]ऽमृतं ब्रह्मणि तत्सत्यं देवा यदहं वदामि माऽहमकामो मर्षि[10]; पुरुष एव मणिः[11] = ०नकाममाराय[12] स्वाहा' (तु. तैआ. ३.१०.१४)॥ २४॥

'वायुर्मे प्राणे श्रितः०'; 'आदित्यो मे चक्षुषि श्रितः०'; 'दिशो मे श्रोत्रे श्रिताः०'; 'चन्द्रमा मे मनसि श्रितः०'; 'आपो मे रेतसि श्रिताः०'; 'ओषधिवन-स्पतयो [13][मे लोमसु श्रिताः०'; 'पृथिवी मे][13] शरीरे श्रिता०'; 'पर्जन्यो मे मूर्ध्नि श्रितः०'; 'इन्द्रो मे बले श्रितः०'; 'ईशानो[14] मे मन्यौ श्रितः०'; 'आत्मा म आत्मनि श्रितः०'; 'आत्मा हृदये हृदयं मयि, अहममृतेऽमृतं (ब्रह्मणि तत्सत्यं देवा यदहं वदामि)[15] = ०नकाममाराय स्वाहा' (तु. तैआ. ३.१०.१४-२४) **इति**॥ २५॥

१-१. M^1 H^1 H^2 abri as अदिते= and thereafter broken. २-२. M^1 H^1 घारा वा...ाज्येन, H^2 रा वा...आ०. ३. M^1 H^1 ०ऽग्निर्जु०; thus H^2. ४. M^1 H^1 प्राणं; thus H^2. ५. M^1 ०युर्जुहो०; thus H^2. ६. M^1 H^1 ०क्षुषी; thus H^2. ७. M^1 H^1 H^2 आपो. ८. Broken in M^1 H^1 स्वाहा...होमि, H^2 स्वाहा...स्वाहा. ९-९. M^1 H^2 श्रित...तेऽमृतं, H^2 wrongly वायु for वाग्. १०. H^2 मषि. ११. M^1 Text abri. १२. M^1 H^1 ०माराधय; thus H^2. १३-१३. M^1 H^1 broken ०पतयो...शरीरे, H^2 रेतसि श्रिता, H^2 om लोमसुश्रिताः पृथिवी में शरीरे श्रिता. १४. H^2 ०शानौ. १५. M^1 H^2 abri, ०मृते = मनका०.

अथ परिषिञ्चति- 'अदितेऽन्वमꣳस्था' **इति दक्षि(णतः**; 'अनुमतेऽन्वमꣳस्था' **इति पश्चात्**; 'सरस्वतेऽन्वमꣳस्था' **इत्युत्तरतः**; 'देव सवितः)[१] प्रासावीः' **इति समन्ततः**[२]॥ २६॥

अथैतस्य स्थालीपाकस्योप[स्तीर्याज्ये][३]**नाभिपूर्याभिददिं कृत्वाऽवेक्षते**- 'यन्मे मनः परागतं यद्वा [४](मेऽपरागतम्। राज्ञा सोमेन तद्वयमस्मा)सु धारयामसि' इति॥ २७॥

अथ यद्यात्मानं [५]**परिपश्येद् यं कामं कामयेत सर्वमायुरियादिति तस्मै** [६]**[हविः]शेषं [द]द्यात्**[६]**। अथ यद्यात्मानं न**[७] **परिपश्येदात्मनैव प्राश्नीयात्**[८]॥ २८॥

अथ प्राशनमन्त्राः- *अश्मेव स्थिरो[९] [भूयासं जागतेन छन्दसा। पुरुषो मणिः, प्राणः सूत्रम्, अन्नं ग्रन्थिः, तं ग्रन्थिम् उद्ग्रथ्नाम्यन्नकामो मृत्यवे ब्राह्मणम्। अपि सर्वमायुरशीयाऽऽयुष्मान्, माऽहमकामो मरिष्यामि, अन्नवान् अन्नादो भूयासं ब्रह्मणि तत्सत्यं देवा अन]काममाराय।*

अय इव (स्थिरो भूयासं तत्सत्यं देवा = माराय);

लोहमिव (स्थिरो भूयासं तत्सत्यं देवा = माराय);

सीसमिव (स्थिरो भूयासं तत्सत्यं देवा = माराय);

रजतमिव (स्थिरो भूयासं तत्सत्यं देवा = माराय);

सुवर्णमिव (स्थिरो भूयासं तत्सत्यं देवा = माराय);

ब्रह्मेव (स्थिरो भूयासं तत्सत्यं देवा = माराय);

तत्सत्यं देवा = माराय' **इति**॥ २९॥

---

१. M[1] abri, °दक्षि = प्रासा°. २. M[1] H[1] समस्तम्, H[2] समन्तम्. ३. M[1] H[1] स्योप...नाभि°, H[2] °स्योपरि...पूर्याभि°. ४. M[1] H[2] abri, यद्वा = सु. ५. M[1] H[1] यद्यथयात्मा°; thus H[2]. ६-६. M[1] H[1] तस्मै शेष...द्या°, H[2] शेषनद्या. ७. M[1] om न. ८. M[1] H[1] प्राणी°; thus H[2]. *-*. M[1] H[2] 'स्थिरो...काममारास्य; आदित्यो मे चक्षुषि श्रितः = ब्रह्मणि तत्सत्यं देवा = काममाराय'; cf *ŚāṅkhĀ* 11.8. ९. M[1] broken between स्थिरो and H[2] after भव up to काममारस्य मे ब्राह्ममसि; cf *ŚāṅkhĀ* 11.8.

अथैतस्य स्थालीपाकस्योच्छिष्टं प्रियायै वा भार्यायै वा दद्यात्। प्रियाय वा ज्ञातयेऽन्ते[1]**[वासिने वाऽप्यन्यस्मै वा यस्मै कामयेत॥ ३०॥**

अथ][1] **अभिमृशते**-'अग्निर्मे वाचि[2] श्रितः' = माराय; 'वायुर्मे प्राणे श्रितः' =(माराय)[3]; 'आदित्यो मे (चक्षुषि श्रितः)[4]' = माराय **इति॥ ३१॥**

अथोत्तिष्ठति- 'उदायुषा (स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोद-स्थाममृताँ)[5] अनु' **इति॥ ३२॥**

अथादित्यमुपतिष्ठते- 'तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम(शरदः शतम्। जीवेम शरदः शतम्। नन्दाम शरदः शतम्। मोदाम शरदः शतम्। भवाम शरदः शतम्। शृणवाम शरदः शतम्। प्र ब्रवाम शरदः शतम्। अजीताः स्याम शरदः शतम्। ज्योक् च सूर्यं)[6]दृशे' **इति॥ ३३॥**

अथाप उपस्पृश्यात्मानमेव प्रत्य[वेक्षते-'पुनर्म आत्मा पुनरायुरागात् पुनः प्राणः पुनराकूतमागात्]**[7]** वैश्वानरो रश्मिभिर्वावृधानोऽन्तस्तिष्ठत्वमृतस्य[8] गोपाः' **इति॥ ३४॥**

[मृत्युदिवसे मृत्युपूर्वविहितकर्म]

पुण्याहं वाचयित्वा तदहः कर्मारभेत॥ ३५॥

युग्मा ब्राह्मणा अन्नेन परिविष्टास्तृणपाणयः प्राङ्मुखास्तृणेषु तिष्ठन्ति॥ ३६॥

तान् अब्गन्धपुष्पाक्षतदक्षिणाभिराराध्य दक्षिणेन [1][हस्तेन] **धारयन् वाचयिता तृणेष्वेव तिष्ठति॥ ३७॥**

तस्य दक्षिणं बाहुमनु स्वामी तिष्ठति॥ ३८॥

तत एनान्[10] **वाचयति**- 'मनः समाधीयताम्' **इति॥ ३९॥**

'समाहितमनसः स्मः' **इतीतरे प्रतिब्रूयुः॥ ४०॥**

१-१. M^1 H^1 H^2 broken; cf *Śāṅkhā* 11.8. २. M^1 H^1 वायु; thus H^2. ३. M^1 H^1 H^2 om. ४. M^1 H^2 om. ५. M^1 H^2 abri उदायुषा=अनु. ६. M^1 H^1 H^2 abri as पश्येम=दृशे. ७. M^1 H^1 H^2 broken. ८. H^2 ○ष्ठत्यमृ○. ९. M^1 H^1 H^2 broken. १०. H^2 एतान्.

'प्रसीदन्तु भवन्तः' **इत्याह॥ ४१॥**

'प्रसन्नाः स्मः' **इतीतरे॥ ४२॥**

'शान्तिरस्तु', 'तुष्टिरस्तु', 'पुष्टिरस्तु', 'ऋद्धिरस्तु' **इति॥ ४३॥**

एतस्य[1] प्रजापतेर्वा नाम गृह्णाति- 'असौ प्रीयतामसौ प्रीयताम्' **इति॥ ४४॥**

'प्रीयतामसौ' **इतीतरे॥ ४५॥**

'पुण्याहं भवन्तो ब्रुवन्तु' **इति॥ ४६॥**

त्रिराह- 'ओऽम् पुण्याहम्' **इतीतरे॥ ४७॥**

'ओऽम् स्वस्ति भवन्तो ब्रुवन्तु' **इति॥ ४८॥**

त्रिराह- 'ओꣳ स्वस्ति' **इति तथैवेतरे॥ ४९॥**

'ओमृद्धिं भवन्तो ब्रुवन्तु' **इति॥ ५०॥**

[2]'कर्मर्ध्यताम्' इति[इतरे अर्धयन्ति[2], नास्य कर्मोपहतं भवति॥ ५१॥

आपोहिष्ठीयाभिस्तिसृ[3]भिरपाꣳ स्तोत्रेण पवमानेनेत्यनुवाकाभ्यां व्याहृतिभिश्चाद्भिः स्वामिनं मार्जयन्ति॥ ५२॥

स्नात्वा शुचिः प्रक्षालितशुक्ल[4]वासाः प्रागपवर्गाण्युदगपवर्गाणि प्राङ्मुखो [5][देवकर्माणि।][5] दक्षिणामुखः[6] प्राचीनावीत्यपसव्यं पि[7]त्रियाणि तिष्ठन्नासीनश्च यथान्यायम्[8]॥ ५३॥

---

१. Due to displacement of folios in M^1 p.12, line 8 text beginning with एतस्य प्रजापते° and ending with ह्वसिष्ठ उत्तर इति is given on p.12, line 8-19 in M^1, p.21, line 4 - p.22, line 6 in H^1 and p.12, line 11-22 in H^2. This displacement has been noticed in the marginalia note as- अत्र ग्रन्थपातेन प्रमादः। अत ब्रवीतीत्यतः परं किञ्चिद् ग्रन्थपातः। ततश्च १५ भागे (२) इति चिह्नित स्थलपर्यन्तं प्रकृतोपयुक्तो वाचनीयः। अनन्तरं अस्मिन् १२ भागे ८ पंक्तिर्योजयितव्या। अनन्तरं पृ. १७ भागे २० य पङ्क्ति प्रकृतः। (M p.12). This displacement is not in H^2. २-२. M^1 H^1 H^2 text broken इति...यति. ३. M^1 H^1 स्त्रिभिः; thus H^2. ४. M^1 H^1 °लितवासा; thus H^2. ५-५. M^1 H^2 text broken; M^1 '°मुखो ये`...दक्षि°', $H^1$ °मुखो य गा दक्षि°, $H^2$ °मुखो य...`...गा दक्षि°. ६. H^2 क्षिणाभिमुख. ७. H^2 चितिया°. ८. M^1 H^1 H^2 न्यायस्त्रि°.

त्रि[1]प्रादेशाः परिधयो[1] द्विप्रादेशानीध्मकाष्ठानि परिणाहेऽङ्गुलि-मात्राणि॥ ५४॥

द्राघीयान् दक्षिणः परिधिः कनीयाꣳ स्थविष्ठो मध्यमः परिधिरणिष्ठो ह्रसिष्ठ उत्तर इति॥ ५५॥

इति चतुर्थाध्याये प्रथमः खण्डः

---

१. M[1] H[1] H[2] त्रिः प्रादेशाः°; thus H[2].

अथ चतुर्थाध्याये द्वितीयः खण्डः

अथ परिधिकर्म[१]

अथातः परिधिकर्म[२] एव सं[पाद्यते]॥ १॥

पूर्वपक्ष एव परिधिकर्म कुर्वीत॥ २॥

अथ यद्यपरपक्षेऽमावास्यायां निशि[३]॥ ३॥

अनुदकशिञ्जेऽग्निमुपसमाधाय शोभयित्वा, बर्हिषा परिस्तीर्य, आज्यं विलाप्योत्पूय शम्याः, परिधीन् कृत्वाऽहतं वासः परिधाप्या[४]न्वारब्धेषु जुहोति– 'यस्यै भिये देवा[५] बिभ्यति ततो नो अभयं कृधि स्वाहा'; 'यस्यै भिये मनुष्या[६] बिभ्यति ततो नो (अभयं कृधि)स्वाहा'; 'यस्यै भिये पितरो बि(भ्यति ततो नो अभयं कृधि) स्वाहा'; 'यस्यै भिये पशवो बि(भ्यति ततो नो अभयं कृधि स्वा)हा'; 'यस्यै भिये वयाꣳसि बि(भ्यति ततो नो अभयं कृधि स्वा)हा'; 'यस्यै भिये गन्धर्वाप्सरसो बिभ्यति (ततो नो अभयं कृधि) स्वाहा'; 'यस्यै भिये सर्पेतरजना[७] बि(भ्यति ततो नो अभयं कृधि) स्वाहा'; 'यस्यै भिये देवा मनुष्याः पितरः पशवो वयाꣳसि गन्धर्वाप्सरसः [८]'सर्वे जना बिभ्यति ततो नो अभयं कृधि स्वाहा' **इति॥ ४॥**

---

१. M[1] Due to displacement of folios the text dealing with परिधिकर्म, beginning with अथातः परिधिकर्म and ending with संतिष्ठते परिधिकर्म has come on p.24, line 13 to p.25, line 12 in M[1], p.45, line 5 - p.47, line 10 in H[1], and p.21, line 14 to p.23, line 10 in H[2] and it is not found in M and Ad. २. M[1] H[1] °कर्मण एव स...; H[2] परिधिः.... ३. M[1] H[1] निशि, H[2] निशायाम्. ४. H[2] धाव्य; thus M[1] H[1]. ५. M[1] देव. ६. M[1] H[1] मनु° ..., H[2] broken. ७. M[1] H[1] सवेत°; thus H[2]. ८. M[1] H[1] सर्वेतर°, H[2] सर्पे°.

अथ तिस्रः शान्ताचीर्जुहोति–'उत त्या[1] नो दिवा (मतिरदितिरूत्याऽऽगमत्। सा शन्ताची मयस्करदपस्निधः स्वाहा'; 'उत त्या दैव्या भिषजा शं नस्करतो अश्विना। यूयातामस्मद्रप अपस्नि)धः[1] स्वाहा'; [2]'शमग्निरग्निभि(स्करत् शं नस्तपतु सूर्यः। शं वातो वात्वरपा) अपस्निधः स्वाहा'[2] **इति॥ ५॥**

अथैतां जुहोति– 'आ मे गृहा भवन्त्वा[3](प्रजा म आ मा यज्ञो विशतु वीर्यावान्। आपो देवीर्यज्ञिया माऽऽविशन्तु सहस्रस्य मा भूमा मा प्र हासीद्'**इति)॥ ६॥**

अथैतां जुहोति– 'अग्निना तपोऽन्वभवद्'[4] **इति॥ ७॥**

अथैतां जुहोति– 'अग्नये समनमत् (पृथिव्यै समनमद्यथाऽग्निः पृथिव्या समनमदेवं मह्यं भद्राः सन्नतयः सं नमन्तु)[5] **इति॥ ८॥**

अथैतां जुहोति– 'अप नः शोशुचदघम्'[6] **इति॥ ९॥**

अथैते जुहोति–'प्रजापते (न त्वदेतान्यन्यो = रयीणाम्'); 'स वेद(पुत्रः पितरꣳ स मातरꣳ स सूनुर्भुवत् स भुवत् पुनर्मघः। स द्यामौर्णोदन्तरिक्षꣳ स सुवः स विश्वा भुवो अभवत् स आऽभवत्') **इति॥ १०॥**

द्वार्यश्मानं निदधाति– 'इमं जीवेभ्यः परिधिं दधामि मा नोऽनुगादपरो अर्धमेतम्। शतं जीवेम शरदः पुरूचीरन्तर्मृत्युं दध्महे पर्वतेन' **इति॥ ११॥**

तमुपर्युपर्यत्यक्रामीत्[7]**॥ १२॥**

अनड्वाहमन्वारभन्ते[8]– 'अनड्वाहमन्वारभामहे[8] साधु दान्तꣳ स्वस्तये। स न इन्द्र इव देवेभ्यो वह्निः संपारणो भव' **इति॥ १३॥**

अनडुहो वालधानकाण्डमन्वारभ्य प्रसलैरगारं[9] **त्रिः परियन्ति**–'परीमे गामनेषत पर्यग्निमहार्षत[10]। देवेष्व[क्र]त[11] श्रवः क्षयं क इम[ाँ आ दधर्ष]ति[12]; 'न हि ते अग्ने तनुवै क्रूरं चकार मर्त्यः। कपिर्बभस्ति तेजनं पुनर्जरायु गौरिव' **इति। १४॥**

१-१. M[1] H[1] ०होत्युदक्या; thus H[2] नो दिवा=स्निधा; cf *TB* 3.7.10.11-12. २-२. M[1] H[1] H[2] शमग्निरग्निभि=अपसिधः; cf *TB* 3.7.10.13. ३. M[1] H[1] भवन्त्य०; thus H[2]; cf *TS*.7.3.14.1. ४. Cf *TS*.7.3.14.1-24. ५. Cf *TS*.7.5.23.1-10. ६. Cf *TĀr*.6.10.4. ७. H[2] ०क्रामदु०. ८-८. M[1] H[1] ०भस्तेनड्वा०. ९. H[2] ०ङ्गारं. १०. M[1] H[1] H[2] ०हर्षत. ११. M[1] H[1] H[2] ०ष्व...त. १२. M[1] H[1] H[2] इम...ति.

अथैतच्चैवाहतं वास एतञ्चानड्वाहं दक्षिणां ददाति॥ १५॥

संतिष्ठते परिधिकर्म इति॥ १६॥

[इति परिधिकर्म]

[शान्तिपाठः]

शं नो मित्रः [१](शं वरुणः शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः॥
नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि।
त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि।
सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु।
अवतु माम्। अवतु वक्तारम्। ओऽम्) शान्तिः[१] शान्तिः।
शान्तिर्नो अस्तु। सुखं नो अस्तु। शिवं नो अस्तु।
अभयं नो अस्तु॥[२] **१७॥**

[इति परिधिकर्म]

इति चतुर्थाध्याये द्वितीयः खण्डः

१-१. M[1] abri शन्नो मित्र=शान्तिशान्ति°. २. Due to displacement of folios the text dealing with इतरो दहनविधि has wrongly come here in M[1] on p.25, line 16, in H[1] p.48, line 1 and in H[2] p.23, line 15 onward. This text has been shifted to its proper place after दहनविधिप्रयोग on p.92 onward . See also fn. 1, p.92.

अथ चतुर्थाध्याये तृतीयः खण्डः

अथ दहनपूर्वकर्म

[1]न म्रियमाणमनधः[2] संवेशयेत्॥ १॥

तस्य दक्षिणे कर्णे जपति– 'आयुषः प्राणꣳ संतनु'; [3]('प्राणादपानꣳ संतनु'; 'अपानाद् व्यानꣳ संतनु'; 'व्यानाच्चक्षुः संतनु'; 'चक्षुषः श्रोत्रꣳ संतनु'; 'श्रोत्रान्मनः संतनु'; 'मनसो वाचꣳ संतनु'; 'वाच आत्मानꣳ संतनु'; 'आत्मनः पृथिवीꣳ संतनु'; 'पृथिव्या अन्तरिक्षꣳ संतनु'; 'अन्तरिक्षाद् दिवꣳ संतनु'; 'दिवः सुवः संतनु')[3] **इति॥ २॥**

वैष्णवानि च नामानि [अ][4]भिवदति – 'तमु स्तोतारः[5] पूर्व्यं (यथा विद ऋतस्य गर्भꣳ हविषा पिपर्तन। आऽस्य जानन्तो नामचिद्विवक्तन बृहत्ते विष्णो सुमतिं) भजामहे[5] **इति॥ ३॥**

[6]**होतारो ह वाव पृथिव्या अग्नेरपामिन्द्रस्याहोरात्राणामर्धमासानामृतूनां**

---

१. Due to displacement of folio the text beginning with न म्रियमाणमनधः संवेशयेत् and ending with भजामहे इति is wrongly given in M^1 on p.27, line 9-10, H^1 p.51, line 10-14 and H^2 p.25, line 11-14 after दहनविधि. I have placed here after शान्तिपाठः and before दहनविधिः. cf *ĀgniGS* 3.4, l.1-4. २. H^2 °नसः. ३-३. M^1 H^1 H^2 om. For text under bracket see *Tait.Br.* 1.5.7.1-12. ४. M^1 H^1 नामानि...भिव°, H^2 नामानि... षाभिव°. ५-५. M^1 H^1 H^2 °तारमुर्व्यं (=)भजामहे; for the full text of the mantra see *Tait.Br.* 2.4.3.23. ६. Due to displacement of folios the text of *sūtras* 4-6 found in M^1 p.18, line 1-10; H^1 p.32, line 1-13; H^2 p.14, line 19- p.16, line 3. The text 'यो ह वाव पृथिव्या अग्नेरपामिन्द्रस्याहोरात्राणामर्ध-मासानाम...' is also wrongly given in M^1 p.15, line 3-4, H^1 p.26, line 11-12. The displacement of text has been recorded in marginalia note in M^1 p.12, line 8. M^1 H^1 ...होतारो, H^2 'योहवाव पृथिव्या अग्नेरपामिन्द्रस्या-होरात्राणामर्धमासानां...स्नातारो ह वा व पृथिव्या अग्नेरपामिन्द्रस्याहोरात्रामर्धमासानामृतूना°.

संवत्सरस्य प्रजापतेर्हृदयं [१]जनित्रमायतनं सम्बन्ध [२]प्रतिष्ठा। तद् य एवं वेदामृतो भवति॥ ४॥

[३]अथ ह ब्रह्म[३] प्रजापतिमुवाच त्वं[४] मैनं ब्रूहीति[४]। तस्मा उ हैतदे[५]वामृतमुवाच य एवमेते प्राणेषु होतारो व्याख्यायन्तेऽथ हह तस्मा उवाच ॥ ५॥

गार्हपत्य आज्यं विलाप्योत्पूय[६] स्रुवं[७] च स्रुचश्च[८] संमृज्यात्रैव दशहोतारं गार्हपत्ये जुहुयात्, सप्तहोतारमाहवनीये, [९]षड्ढोतारमन्वाहार्यपचने, पञ्चहोतारं[९] सभायाम्। एतदेवामृतं भवतीति॥ ६॥

इति चतुर्थाध्याये तृतीयः खण्डः

---

१. H^2 ०ञ्जनमत्र०; thus M^1 H^1. २. H^2 संबद्धः; M^1 H^1 सम्बन्ध. ३-३. H^2 अथ न ब्रूम; thus M^1 H^1. ४-४. M^1 H^1 H^2 त्वं...हीति. ५. H^2 हैतं देवा०. ६. M^1 विलाप्योऽपूय, H^1 विलाप्योपूय; thus H^2. ७. M^1 H^1 om; thus H^2. ८. M^1 H^1 स्रचञ्च; thus H^2. ९-९. H^2 ०हवनीये...सभायाम्; thus M^1 H^2, but wrongly give the sign of broken text as होतारं...रं सभा०.

अथ चतुर्थाध्याये चतुर्थः खण्डः

[1]अथ दहनविधिः

स यद्यस्य[2] माता वा पिता वाऽऽचार्यो वा प्रियो वा ज्ञातिर्वा प्रेयात् तस्मा आग्निधेयिकान् संभारान् संभरेद्, अन्यत्राशनिहतात्॥ १॥

अथानुस्तरणीं मीमाꣳसेत। सा या रोहिणी पिङ्गलैकहायनी स्यात्, तां कुर्वीत। तन्नु [3]ह रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति[3]। [तस्मात् तां कुर्वीत][4]॥ २॥

सा या रोहिणी लक्ष्मणा पष्ठौही वार्त्रघ्नी स्यात्, तां कुर्वीत। तन्नु ह रोहिणीं लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं[5] ददाति, तस्मात् तां कुर्वीत॥ ३॥

सा या जरती मूर्खा तज्जघन्या स्यात् तां कुर्वीत। तन्नु ह जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुर्वन्ति। तस्मात्[6] तां कुर्वीत॥ ४॥

अथ यदत्र स्त्रियः कुर्वन्ति ताः कुर्वतीरभीक्षेत्॥ ५॥

आ[6]ज्यं विलाप्योत्पूय[7] स्रुवं च स्रुचं च संमृज्यारण्योरग्नीन्[8] समारोप्योद्गूहति[8] इमां दिशं दक्षिणां प्रतीचीं यत्रैषां दहनं जुष्टं भवति॥ ६॥

यत्र वा वत्स्यन्तो मन्यन्ते [9]तदुद्धृत्यावोक्ष्य [10]कर्णकवतीं चाकर्णकां[10]

---

१. Due to displacement of folio M^1 gives the text dealing with दहनविधि on p.18, line 10 onward upto p.24, H^1 on p.32, line 14 - p.50, line 5, and H^2 on p.15, line 3 onward, upto p.27, line 8. २. H^1 यत् यस्य. ३-३. H^2 broken तन्नु ह...सा या; thus M^1. ४. M^1 H^1 H^2 broken. ५. M^1 वर्त्रघ्नीं. ६-६. H^2 तस्मा... स्त्री...आज्यं, M^1 H^1 ०भीक्षे...ज्यं०. ७. M^1 ०लाप्योऽपूल; H^1 H^2 ०प्योपूल. ८-८. M^1 H^1 ०ज्यारव्योर०; thus H^2, M^1 H^1 ०ग्नेराह्योगूह०, M^1 H^1 H^2 ०हेराह्योद्ग०). ९. M^1 H^2 तद्धुद्धत्या०; thus H^1. १०-१०. M^1 H^1 कण्टवतीं चाकण्टका०; thus H^2.

च शाखे आदाय 'अपेत वीत[१] वि च सर्पत(तः)' **इत्यवकाशादुदजति।** '°येऽत्रस्थ = अस्मा'[१] **इति॥ ७॥**

व्युदस्य शाखे अप उपस्पृश्य 'अग्नेर्भस्मासि' **इति भस्म निवपति;** 'अग्नेः पुरीषमसि' **इति पुरीषम्;** 'संज्ञानमसि कामधरणम्' **इति सिकताः;** 'मयि ते कामधरणं भूयाद्' **इत्यूषान्**[२]; 'सं या [३]वः प्रियास्तनुवः' **इत्यान्तम् अनुव्यूहति मध्ये संभाराणां षट्॥ ८॥**

चतुर्गृहीतानि[४] **जुहोति**– 'अग्निनाऽग्निः', 'अग्निनाऽग्निरुपसृजन्'[४], 'मनो ज्योतिर्जुषताम्'; 'तन्तुं तन्वन्'; 'त्वमग्ने सप्रथा असि' **इति॥ ९॥**

अत्र चितां कुर्वन्ति॥ १०॥

अग्रेण चितां कर्षूं कुर्वन्ति॥ ११॥

तामद्भिः संपूरयति॥ १२॥

अपि हास्य गर्भाः पतिता एना[५] **आप उपजीवन्ति॥ १३॥**

अग्रेण कर्षूं शाखे निघ्नन्ति नैय्यग्रोधीं च पालाशीं च ॥ १४॥

दक्षिणत[६] **एव नैय्यग्रोधीमुत्तरतः**[७] **तत् पालाशीम्॥ १५॥**

स यन् नैय्यग्रोधीं[७] **फलवतीमपि हास्य गर्भा पतिता एतानि फलान्युपजीवन्ति॥ १६॥**

अथ यत्पालाशीमपां वा एतद्रूपमपां पुष्पं यत्पालाशः। तन्नु ह पालाश[८]**पूतेनापि स्त्रियो नदीं यजन्ते॥ १७॥**

पालाशान् ज्ञातयः[९] **कुर्वन्ति॥ १८॥**

दक्षिणत उदकुम्भं नि[१०]**मिन्वन्ति॥ १९॥**

दक्षिणतोऽग्निं मन्थन्ति॥ २०॥

१-१. H^2 वीत...अस्मा; thus M^1 H^1, M^1 इत्याकाशा°. २. M^1 H^1 °दित्यू, H^2...षान्. ३. M^1 H^1 H^2 यापः. ४. H^2 °गृहीताग्निरुपसृजन्. ५. H^2 एता. ६. M^1 H^1 दक्षिण एव; thus H^2. ७-७. M^1 °मुत्तरतत्पालीशीं, H^2 om उत्तर= नैप्यग्रोधीं; thus M^1. ८. M^1 H^1 H^2 °दूते°. ९. H^2 °लाशाञ्छलान्. १०. M^1 H^1 H^2 निमन्व°.

तं मथित्वा [1]शकृत्पिण्डैरेव विहरन्ति॥ २१॥

गार्हपत्य आज्यं विलाप्योत्पूय स्रुवं च स्रुचं च सं)[1]मृज्यात्रैव चतुर्गृहीतं गृह्णीते। तज्जुहोति वैकंकतीꣳ समिधमाधाय[2] गार्हपत्ये– 'यत्पृथिव्या अनामृतꣳ संबभूव त्वे सचा। तदग्निरग्नये ददात् तस्मा आमुष्यायणाय ब्रह्मणो लोके शर्मवर्मक [3]त्वाꣳ स्वाहा' **इति॥ २२॥**

अपरं चतुर्गृहीतं गृह्णीते। तज्जुहोति वै[कंकतीꣳ समिधमाधा-][4] यान्वाहार्यपचने– 'यदन्तरिक्षस्यानामृतं संबभूव त्वे सचा। तद्वायुर्वायवे ददात् तस्मा आमुष्यायणाय ब्रह्मणो लोके शर्मवर्मक त्वाꣳ स्वाहा' **इति॥ २३॥**

अपरं चतुर्गृहीतं गृह्णीते। तज्जुहोति वैकंकतीꣳ समिधमाधाया–हवनीये– 'यद् दिवोऽनामृतꣳ संबभूव [5]त्वे सचा। तदादित्य[5] [आदित्याय ददात् तस्मा आमुष्यायणाय][6] ब्रह्मणो लोके शर्मवर्मक[7] त्वाꣳ स्वाहा' **इति॥ २४॥**

अपरं चतुर्गृहीतं गृह्णीते। तज्जुहोति वैकंकतींꣳ समिधमाधायाहवनीय एव– 'यद् दिशोऽनामृतꣳ संबभूव त्वे सचा तच्चन्द्रमाश्चन्द्रमसे ददात् तस्मा आमुष्यायणाय ब्रह्मणो लोके शर्मवर्मक[8] त्वाꣳ स्वाहा' **इति॥ २५॥**

अपरं चतुर्गृहीतं (गृह्णीते। तज्जुहोति वैकंकतीꣳ)[9] समिधमाधाया–हवनीय एव– 'अयं वै त्वमस्मादधि त्वमेतदयं वै तव योनिस्त्वदस्य योनिरसि वैश्वानरः पुत्रः पित्रे लोककृज्जातवेदो वहास्येमꣳ सुकृताꣳ यत्र लोकाꣳ[10] स्वाहा' **इति॥ २६॥**

एतस्मिन्काले कृसरां सर्पिष्मतीं[11] ब्राह्मणायानुस्तरणीं दद्यात्[12]॥ २७॥

[13]यदि न [दद्या]दित्य[स्या इमान्यङ्गा][13]न्युद्धरन्ति हृदयजिह्वा-[14]वक्षस्तनिममतस्नमेदः[14]॥ २८॥

१-१. M^1 H^1 ०आज्यं=मृज्या०, H^2 मथित्वा...मृज्या०. २. H^2 ०मादाय; thus M^1 H^1. ३. M^1 H^2 त्वतागुं; thus H^1. ४. M^1 H^1 broken वै...यान् वा०, H^2 om. ५-५. H^2 ०बभूव...ब्रह्म०; thus M^1 H^1. ६. M^1 H^1 H^2 broken. ७. M^1 H^1 H^2 वर्मकत्व तागुं०. ८. M^1 H^1 H^2 ०कत्व ताꣳ. ९. M^1 H^1 broken; thus H^2. १०. H^2 लोका; thus M^1 H^1. ११. M^1 H^1 H^2 ०मती. १२. H^2 ०ददाति. १३-१३. M^1 H^1 यदि नादित्य...न्यु०, H^2 ददाति...यान्यु०. १४-१४. M^1 ०पक्षस्तनिममतनयं, H^1 ०तनियममतनयं, H^2 ०तनिममतस्ने यन्मेदः.

तद्विलाप्याज्ये सꣳसृजति॥ २९॥

अर्द्धं प्रावरणाय निदधाति[1]॥ ३०॥

[2]अथैनं दक्षिणतः प्राञ्चमुत्तानं चितौ संवेशयन्ति–'यत्पृथिव्या आर्द्रममृतमन्नादं तस्मिꣳस्त्वा निदधाम्यसौ' **इति॥ ३१॥**

अथास्य प्राणायनेषु हिरण्यशल्का[3][न् प्रत्यस्यति मुखे नासिक-योरक्ष्णोः कर्णयोरिति। चतुर्होतारं मुखे, अक्षिकक्ष्योर्द्विः पञ्चहोतारम्, कर्णयोर्द्विः षड्ढोतारम्, चतु]हौतारमुत्तरे, पञ्चहोतारं दक्षिणे कर्णे, षड्ढोतारमुत्तरे, [4](द्विः) सप्तहोतारं (कीकसासु)[5]॥ ३२॥

[पितृमेधकर्मणि चतुर्होतृविदाचार्यस्य महत्त्वम्]

अथ ह ब्रह्म प्रजापतिमुवाच–'यः[6] किं[7]करति सोऽमृतो भवति, स पुनर्मृत्युमपजयति यो वा अरण्यं गत्वाऽग्निहोत्रं जुह्वत् तपस्यमानः[8]॥ ३३॥

अथो आ[9]हुः–('एष उ) वा [1]अन्नस्य शिर आवधीः' इति। एष उ ह [10]वैवान्नस्य शिर आहन्ति, यच्चतुर्होतृभिः [11]कल्पयन्ति। तदेतन्नित्यं देवसत्यम्। यच्चतुर्होतारोऽभ्याख्यानमेवान्यत्। तस्माच्चतुर्होतृविदमेवाचार्यं वृणीत॥ ३४॥

चतुर्होतृविदमु ह वै जानुभ्याꣳ सर्पन्तमरण्ये[12] मृत्यु[13][रुपागच्छत्। त]मेवाह-[कि]मिच्छन्[13] भगवो जानुभ्याꣳ सर्पसी'ति। अमृतमेवाहमिच्छन् भगवो जानुभ्याꣳ सर्पामि' इति। तꣳ होवाच–'उत्तिष्ठतु भगवान्, अमृतं ते वक्ष्यामि'। अथ मे चतुर्होतॄणां कस्त्वं[14] ब्रूहीति[15]॥ ३५॥

तस्मा उ [16]हैतदेवामृतमुवाच, एतमाहुतिनिकायमेताः स्त्रुवाहुतीः–'इदं

---

१. M[1] ०धति. २. H[2] अथे०. ३-३. M[1] H[1] broken, ०शल्का...होता०; H[2] षु नि...होता; cf *ĀgniGS* 3.4.1: 136.1-4 . ४. M[1] H[1] H[2] om. ५. M[1] H[1] H[2] om. cf *ĀgniGS.* 3.4.1; 134, 2.3. ६. M[1] H[1] H[2] या. ७. M[1] किंकरति, H[2] किंकरोति. ८. M[1] H[2] तपस्यमाना...त्याथो. ९-९. M[1] H[1] H[2] आहुर्वान्न०. १०. M[1] H[1] H[2] त्वै०. ११. M[1] H[1] कत्वय०, H[2] कद्वय०. १२. M[1] H[1] सर्वंतमर०, H[2] सर्पन्तꣳ.... १३-१३. M[1] H[1] मृत्यु...मेवाहमिच्छन्, H[2] सर्पन्तꣳ...मेवाह०. १४. H[2] कत्वं. १५. M[1] H[1] व्रीहीति; thus H[2]. १६. H[1] हैदतं देवा०; thus M[1] H[2].

[१]पृथिव्याः शरीरमि[२][यं पृथिवी पृथिव्यास्त्वा शरीराद् ब्रह्म निर्भिनद्मि भूर्भुवः सुवर्][२] असौ [३]स्वर्गाय लोकाय[३] स्वाहा'; 'इदमग्नेः शरीरमयमग्निरग्नेस्त्वा शरीराद् ब्रह्म = (ऽसौ स्वर्गाय लोकाय) स्वाहा'; 'इदमन्तरिक्षस्य शरीरमिदमन्तरि-क्षमन्तरिक्षस्य त्वा शरीराद् ब्रह्म = (ऽसौ स्वर्गाय लोकाय) स्वाहा'; 'इदं वायोः शरीरमयं वायुर्वायोस्त्वा शरीराद् ब्रह्म = ऽसौ (स्वर्गाय लोकाय) स्वाहा'; 'इदं दिवः शरीरमयं द्यौः शरीराद् ब्रह्म= ऽसौ (स्वर्गाय लोकाय) स्वाहा'; '[४]इदमादित्य[स्य शरीरमयमादित्य आदित्यस्य त्वा शरीराद् ब्रह्म = ऽसौ (स्वर्गाय लोकाय) स्वा]हा'; 'इदं दिशाꣳ शरीरमिमा दिशो दिशां त्वा शरीराद् (ब्रह्म)[५] = ऽसौ (स्वर्गाय लोकाय) स्वाहा'; 'इदं चन्द्रमसः [६]शरीरमयं चन्द्रमाश्चन्द्रमसस्त्वा श(रीराद् ब्रह्म) = ऽसौ (स्वर्गाय लोकाय) स्वाहा'; 'इदमाकाशस्य शरीरमयमा-काश आकाशस्य त्वा श(रीराद् ब्रह्म)[७] = ऽसौ (स्वर्गाय लोकाय) स्वाहा'; 'इदं नक्षत्राणां शरीरमिमानि नक्षत्राणि नक्षत्राणाꣳस्त्वा श(रीरमिमानि नक्षत्राणि नक्षत्राणां त्वा शरीराद् ब्रह्म) = ऽसौ [८](स्वर्गाय लोकाय स्वाहा' **इति दश**]॥ **३६**॥

['इदं त आत्मनः शरीरमयं त आत्मा आत्मनस्त आत्मानꣳ)[८] शरीराद् ब्रह्म निर्भिनद्मि भूर्भुवः सुव[रसौ स्वर्गाय लोकाय स्वाहा][९]'; 'इदमोषधीनाम्[१०]'; 'इदं वनस्पतीनाम्'; 'इदं गिरीणाम्'; 'इदं पर्वतानाम्'; 'इदꣳ संकल्पानाम्[११]'; 'इदं भूतस्य'; 'इदं भविष्यताम्'; 'इदमनन्तस्य'; 'इदं [... **इति**][१२] **विꣳशतिः**'॥ **३७**॥

'इदमह्नः'; 'इदं रात्रेः[१३]'; 'इदमहोरात्राणाम्'; ['इदं सप्ताहानाम्'][१४]; 'इदमर्धमासानाम्'; 'इदं मासानाम्'; 'इदमृतू[१५]नाम्'; 'इदं संवत्सरस्य'; 'इदम्[१६] अष्टकायाः'; 'इदममावास्यायाः' **इति त्रिꣳशत्**॥ **३८**॥

'इदं वसूनाम्'; 'इदं रुद्राणाम्'; 'इदमादित्यानाम्'; 'इदमङ्गिरसाम्'; 'इदꣳ साध्यानाम्'; 'इदं भ्राजाम्'; 'इदं विभ्राजाम्'; 'इदमाप्यायानाम्[१७]'; 'इदं नर्याणाम्[१८]' **इति चत्वारिꣳशत्**॥ **३९**॥

---

१. H^2 वृ...रसौ. २-२. M^1 H^1 broken. ३-३. M^1 H^1 H^2 om. ४. M^1 H^1 °मादित्य...हेदं दिशां, H^2 om. ५. M^1 H^1 H^2 om. ६. M^1 चन्द्रमसश्शरीरं twice. ७. M^1 om. ८-८. M^1 H^1 H^2 om; see *ĀgniGS* 3.4.1:135.20. ९. M^1 सुवः...मिदमोषधीनाम्. १०. M^1 H^1 'इदमोषधीनां' twice. ११. M^1 H^1 H^2 सङ्कत्वा-नाम्°. १२. M^1 some text omited. १३. H^1 H^2 रात्रि°. १४. M^1 H^1 H^2 om. १५. H^2 मितू°. १६. M^1 H^1 इदं...काया, H^2 इदम्...अष्ट°. १७. M^1 °माप्यानाम, H^2 °माख्यानम°. १८. M^1 H^2 °मनार्याणाम्, (?) H^1 नर्या°.

'इदं नदीनाम्'; 'इदꣳ समुद्राणाम्[१]'; 'इदमभ्राणाम्'; 'इदं संप्लवानाम्'; 'इदं मरीचीनाम्'; 'इदं विद्युतः'; 'इदꣳ स्तनयित्नोः[२]'; 'इदं पर्जन्यस्य' **इति पञ्चाशत्[२]॥ ४०॥**

'इदमिन्द्राग्न्योः'; 'इदमश्विनोः'; 'इदं पूष्णः'; 'इदꣳ सरस्वत्याः'; '[३]इदं बृहस्पतेः[३]'; 'इदं मित्रस्य'; 'इदं वरुणस्य[४]'; 'इदं त्वष्टुः'; 'इदं धातुः'; 'इदं विष्णोः' **इति षष्टिः॥ ४१॥**

'इदं ब्रह्मणः'; 'इदं ज्योतिषः'; 'इदं तपसः'; 'इदꣳ सुश्रान्तस्य[५]'; 'इदमनूक्तस्य'; 'इदं दशहोतुः[६]'; 'इदं चतुर्होतुः[७]'; '[८]इदं पञ्चहोतुः[८]'; 'इदं [९]षड्ढोतुः'; 'इदꣳ सप्तहोतुः[९]' **इति सप्ततिः॥ ४२॥**

अथ साम[१०] गायते 'नाके सुपर्णमुप [११](यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं)[११] भुरण्युम्' **इति॥ ४३॥**

अथास्य प्राणायनेषु हिरण्यशल्कान् प्रत्यस्य मुखे दशहोतारं जुहुयात्; दक्षिणेऽक्षन् चतुर्होतारमुत्तरे पञ्चहोतारम्; दक्षिणे कर्णे षड्ढोतारमुत्तरे सप्तहोतारम्, नाना चतुर्गृहीतैः॥ ४४॥

[अथ मृतस्य पात्रयागः]

[१२]अथ तत्पात्रयागस्यैव॥ ४५॥

दक्षिणेऽस्य हस्ते स्फ्यं जुहूञ्चादधाति[१२], सव्य उपभृदुपवेषौ, उरसि [१३]ध्रुवारणी, हन्वोरुलूखलमुसले[१४], दत्सु[१५] ग्रावाणो[१६], यदि ग्रावाणो[१७] भवन्ति॥ ४६॥

---

१. M[1] H[1] H[2] ०मुदाराणाम्. २-२. H[2] स्तन...यस्त्वाशदि०. ३-३. H[2] twice. ४. M[1] H[1] वङ्कणस्य; thus H[2]. ५. H[2] ०श्रोत्रस्य; thus M[1] H[1]. ६. M[1] ०होतर्; thus H[2]. ७. M[1] ०होतर्०; thus H[2]. ८-८. M[1] H[1] om; thus H[2]. ९-९. H[2] इदमिति; thus M[1] H[1]. १०. M[1] H[1] समा; thus H[2]. ११-११. M[1] H[1] नाकेसुपर्ण=भ्युरण्युम्; thus H[2]. १२-१२. H[2] अथातः पात्रे...मित्यादधाति; thus M[1], H[1] जुहोत्याद०, H[2] ...मित्यादधाति; M[1] दक्षिणस्य० जुहोत्याद०. १३. M[1] H[1] द्रुवा०; thus H[2]. १४. M[1] H[1] om मुसले; thus H[2]. १५. M[1] H[1] H[2] दसु. १६. M[1] H[1] H[2] ग्राविण्णो. १७. M[1] H[2] ग्राविण्णो.

मुखेऽग्निहोत्रहवणीं, नासिकयोः स्रुवौ, अक्ष्योर्हिरण्यशल्कावा-ज्यस्रुवौ वा, कर्णयोः प्राशित्रहरणे भित्त्वैकैकम्[1]॥ ४७॥

दक्षिणेऽꣳसे[2] **पिष्टसंयवनीम्, उत्तरे पुरोडाशमेक्षणम्**[2]**, शीर्षन्** [3]**क[पाला]नि, ललाट**[4] [5]**एककपालस्य कपालम्**[6]**, मूर्ध्नि चमसम्** 'इममग्ने चमसं मा वि जीह्वर्' **इति; पार्श्वयोः शूर्पम्**[7]**, उदरे पात्रीम्, कुक्ष्योश्चमसावपिधानं**[8] **सान्नाय्यस्य**[9]**, प्रणयनं प्रणीतानाꣳ, श्रोण्योः**[10] **सान्नाय्यतपन्यौ,** [11]**सक्थ्योरन्वाहार्यपचनीम्, वस्तावाज्य**[12]**स्थालीम्, शिश्ने वृषारवं च शम्यां च, अण्डयोर्दृषदुपले**[12]**, पादयोरुपवाजने। शिरस्त उपसादनीयम्॥ ४८॥**

कूर्चं पत्त[13] **उपावहरणीयम् इति॥ ४९॥**

अवशिष्टान्यन्तरेण सक्थिनी निवपति॥ ५०॥

अत्रैव [14]'खारीर्नल्वदृतिः (?)' **इत्यभिप्रविध्यन्ति**[15]॥ ५१॥

मध्ये वाऽऽदित्यमण्डलवत् सर्वाणि करोति॥ ५२॥

अपो वा मृन्मयान्यवहरन्ति॥ ५३॥

ब्राह्मणे[16]**भ्योऽयस्मयानि लोहमयानि दत्त्वा**[16] **[मत]स्ने वक्षसि वक्षस्त-निमोदरे**[17] **हृदयं च जिह्वां च शाखे अनूच्छ्रयन्ति॥ ५४॥**

य एतस्य यमस्य पथिरक्षास्तेभ्य एते मतस्ने[18] **प्रत्यस्य मुखं वपया प्रावृत्याङ्गैरङ्गान्यभिच्छाद्य** 'मेदसा चर्मणा' **इति प्रोर्णोति॥ ५५॥**

सशीर्षपादेनोत्तरलोम्ना 'अग्नेर्वर्म परि गोभिर्व्यवस्व[19]' **इति॥ ५६॥**

---

१. M^1 H^2 भित्वावैकं. २-२. M^1 H^1 °संबन्धवनी°, H^2 broken सेऽपि...क्षिणं. ३. M^1 H^1 H^2 क...नि°. ४. M^1 H^1 लवाट; thus H^2. ५. M^1 H^1 एके कपा°; thus H^2. ६. M^1 H^1 H^2 कपाल. ७. M^1 H^1 H^2 शूर्प. ८. M^1 H^1 मसापविधा°; thus H^2. ९. M^1 सान्नप्य°, H^1 सान्नाप्य°. १०. M^1 श्रोण्या°; thus H^1 H^2. ११. M^1 स्प्यजोर°, H^1 स्प्यचोर, H^2 स्फिजो°. १२-१२. H^2 वस्तावा...ण्डयो...वादयो; M^1 H^1 °वृषारपञ्च शन्या चाण्डये...पाद°. १३. M^1 H^1 पक्त, H^2 च त. १४. M^1 खीदीर्न°, H^2 खादीर्न्न°, H^1 °दीर्नल्वधृ°. १५. H^2 °ध्यति. १६-१६. H^2 ब्राह्मणे...ते, M^1 H^1 °दत्वा...ते. १७. M^1 H^2 °निमोदरे, H^1 °दते. १८. M^1 H^1 मतस्नेम. १९. M^1 H^1 वस्येति, H^2 °गो...तं.

तं पुरस्तादाहवनीय[1][मध]स्तादाहवनीयेनोपसमादधाति॥ ५७॥

दक्षिणतोऽन्वाहार्येण पश्चाद् गार्हपत्येनोत्तरतः सभ्यावसथ्याभ्याम्[2]॥ ५८॥

[भाविस्वर्गगमनलक्षणविज्ञानम्]

अत्र विज्ञानमुपैति॥ ५९॥

स यद्येनमाहवनीयः प्रथमः[3] प्राप्नुयात् तं विद्यात्[4] सुवर्ग एनं लोकः प्रथमः प्रापत्स्यति[5] एष सुवर्ग[6][लोकः॥ ६०॥

स यद्येनम् अन्वाहार्य][6]पचनः प्रथमः प्राप्नुयात् तं विद्याद्[7] अन्नाद एनं प्रथमः प्रापत्स्यति[8], अपोऽमुष्मिन् लोकेऽन्नमस्य प्रजेहेति[9]॥ ६१॥

अथ यद्येनं गार्हपत्यः प्रथमः प्राप्नुयात् तद्विद्यात् प्रतिष्ठैनं प्रथमा प्रापत्स्यति[10]; एषोऽमुष्मिन्लोके स्थ[विमान्, स्थेर्यमस्य प्रजेहेति][11]॥ ६२॥

[12][स यद्येनं सभ्यावसथ्यौ प्रथमौ] प्राप्नुयातां तद्विद्याच्छ्रीरेनं प्रथमां प्रापत्स्यति[13] श्रीमानेषोऽमुष्मिन् लोके श्रीमत्यस्य प्रजेहेति[14]॥ ६३॥

स यदि प्राचीं दिशं धूमो निगच्छेत् तद्विद्याद् वसूनां देवानां सायुज्यं सलोकतामगमद् (इति)[15]॥ ६४॥

अथ यदि प्राच्यां[16] दिशि तदस्याभिजितमिति॥ ६५॥

अथ यदि दक्षिणस्यां[17] दिशि धूमो निगच्छेत् तद्विद्यात् पितॄणाꣳ सायुज्यं सलोकतामगमदिति[17]॥ ६६॥

अथ यदि दक्षिणस्यां दिशि तदस्याभिजितमिति॥ ६७॥

अथ यदि प्रतीचीं दिशं धूमो निगच्छेत् तद्विद्यादादित्यानां देवानाꣳ सायुज्यꣳ सलोकतामगमद् इति[18]॥ ६८॥

---

१. M[1] H[1] नीय...स्तादाहवनीयेनो°; H[2] नीयेनोपसमा°. २. M[1] H[2] °सथीभ्या°. ३. M[1] H[1] °थम प्रा°; thus H[2]. ४. H[2] विद्या सु°. ५. M[1] H[1] H[2] प्रापज्जेष्यते. ६-६. M[1] H[1] सुवर्ण (H[2] °पर्ण)... पचनः. ७. M[1] H[1] विद्यान्नाद; thus H[2]. ८. M[1] H[1] H[2] प्रापदत्स्यषोऽमु. ९. M[1] व्रजहेति; thus H[2]. १०. M[1] प्रापत्स्थास्यति, H[2] प्रपत्स्था°. ११. M[1] H[1] H[2] broken. १२. M[1] broken. १३. M[1] प्रापच्छ्री°. १४. M[1] H[1] व्रजेहेति; thus H[2]. १५. M[1] H[1] H[2] om. १६. M[1] प्राप्यान्दि°. १७-१७. M[1] H[1] दक्षिण...ताम°; thus H[2]. १८. M[1] om; thus H[2].

अथ यदि प्रतीच्यां दिशि तदस्याभिजितमिति॥ ६९॥

अथ यद्युदीचीं[1] दिशं धूमो निगच्छेत् तद्विद्याद् विश्वेषां देवानाꣳ सायुज्यं सलोकतामगमद् (इति)[2]॥ ७०॥

अथ यदि [3][उदीच्यां दिशि तदस्याभिजितमिति॥ ७१॥

अथ यद्यूर्ध्वां दिशं][3] धूमो[4] निगच्छेत् तद्विद्यादङ्गिरसां देवानां सायुज्यं सलोकतामगमद् (इति)[2]॥ ७२॥

अथ यद्यूर्ध्वांयां[5] दिशि तदस्याभिजितमिति॥ ७३॥

अथ यदि सर्वा एव दिशो धूमो निगच्छेत् तद्विद्याद् वसूनां रुद्राणामादित्यानां विश्वेषां देवानामङ्गिरसां मरुताꣳ साध्यानां [6]भ्राजां विशानामाप्यानां नार्याणां पूर्वदेवानां ये चा[न्ये देवास्तेषाꣳसर्वेषां][6] येषाꣳ सायुज्यꣳ सलोकतामगमदिति॥ ७४॥

अथास्य ज्ञातीन् ब्रूयात् 'मा रुदताप्लवध्वम् अलंकुरु मा क्लिष्टीन्वा अयं ब्रह्मणो लोकमगमदि'ति॥ ७५॥

[7]सहधूमेन सहार्चिषा देवान् गच्छति॥ ७६॥

स ब्रह्म गच्छति॥ ७७॥

स एतस्यैव ब्रह्मणः सायुज्यं सलोकतां जयति॥ ७८॥

इति चतुर्थाध्याये चतुर्थः खण्डः

---

१. M^1 H^1 यद्युदीच्यान्धूमो, H^2 उदीच्यान्दिशं°. २. M^1 H^1 H^2 om. ३-३. M^1 H^1 broken यदि...न्धूमो°. ४. H^2 °मा. ५. M^1 यद्यूर्ध्वान्दिशि. ६-६. M^1 H^1 °भ्राजामाप्यानां° ये च...येषां; H^2 भ्राजां विशानासाप्यान... षां सायु°. ७. M^1 सहसधू°, H^1 सहस्रधू°; thus H^2.

अथ चतुर्थाध्याये पञ्चमः खण्डः

अथ दहनविधिप्रयोगः[१]

अथातो[२] दहनविधिः[३]। तस्य संभाराः सर्वौषधः[४]। अत्र केचित् संस्कर्तारो वोढारश्च[५]। 'स यद्यस्य माता वा पिता वा प्रेयादि'ति महामेधे[६] दर्शनात्पुत्रः शिष्यादयः। तत्र ज्ञातिशब्देन भ्रातृपत्नी[७]पुष्यान्तेवासिपितृव्यादयो गृह्यन्ते। तथा बौधायनीये दहनकल्पे दृष्टः- '[८]जातसंस्कारेणेमं लोकमभिजयति[९] मृतसंस्कारेणामुं लोकम्'। [१०]तस्मान्मातरं पितरं [११]भ्रातार[माचार्यं पत्नीं पुत्रं शिष्यमन्तेवासिनं पितृव्यं मातुलं सगोत्रं] चासगोत्रं च दायमुपयच्छति। एते संस्कारेण संस्कुर्वन्ति। सगोत्रं दायमुपयच्छेद्। एते [दहन]संस्कारेण संस्कुर्वन्ति। त एव [१२][शव]भर्तारोऽन्ये समानगोत्रा[१३] वा। राजन्यस्य पुरोहितः, [१४]सहस्रदक्षिणो ब्राह्मणः[१५]। वैश्यस्य [सप्त]गुना[१६] वा। अथाहिताग्निमग्निभिर्दहति[१७], गृहस्थमौपासनेन, ब्रह्मचारिणं कपालसन्तपनाग्निना[१८], उत्तपनीयेनेतरान्[१९]। एवं स्त्रियमि'ति (बौधा.पितृ. ३.१.४.१३)॥ १॥

अत्राचारप्राप्तं[२०] किञ्चिदुच्यते। यद्यनाहिताग्निरौपासनाग्निर्वाँस्तस्य पत्नी वाऽपरपक्षे प्रेयादाहुतिभिरेनं पूर्वपक्षेण[२१]। तत्कथं मरणदिवसादूर्ध्वं यावन्तोऽत

---

१. The text dealing with दहनविधिप्रयोग is found in M (p.518, line 1) and Ad (p.1014, line 8), not in M^1 and H^1 H^2. २. M Ad अथेते. ३. M Ad °विधिं. ४. Due to displacement of some fragment of the original folio, a text 'एकादश्यामेकादिष्टं कुर्यात् इति' consisting of one line has wrongly been copied in both M p.518, line 2 and Ad p.1014, line 8 here. That text has been shifted at its proper place (see fn. 2-2 p.98). ५. Ad वोढाश्च. ६. M Ad °मेधदर्श°. ७. M Ad °पत्नीं. ८. M Ad ज्ञातास्सं°; thus *Baudh* PS 3.1.4. ९. M Ad जयन्ति; thus *Baudh.PS* अभिजयति. १०. M Ad तस्मिन्. ११. M Ad om, probably abrri. १२. M Ad त एव कर्ता°. १३. M Ad °गोत्र. १४. M Ad सहदक्षिणे. १५. M Ad ब्राह्मणे. १६. M Ad वैश्यस्य...सनावा. १७. M Ad °ग्निर्दुहति. १८. M Ad °तपनीयेन°. १९. M Ad °त्तरपनी°. २०. M Ad °प्राप्तिं. २१. M Ad °पक्षं न.

औपासनकाला अनागतारः प्रतिपदं प्रातराहुतिकाल इति। एषामानुपूर्व्येण प्रत्येकं सायं प्रातर्होमं जुहुयात्। तन्त्रेण वा सर्वाः सायमाहुतिभिः[1] सह जुहुयात्। प्रतिसंख्याय गृहीतैर्व्रीहिभिरेव सर्वाश्च प्रातराहुतीरा[2]ऽमावास्यापाककालात्। अथ तदानीमेवामावास्यस्थालीपाकं कृत्वा दहेत्। यदि प्रवासे म्रियेत तैलद्रोण्यां सपथायाहृत्याग्निना संस्कुर्यात्। यद्येवं न शक्नुयात् तत्र लोकाग्नौ पूर्णाहुतिं हुत्वा तूष्णीं दग्ध्वाऽस्थीनि क्षीरेण प्रक्षाल्य केनचिदुन्मुचीकृत्यानीयाग्निना संस्कुर्यात्। यदि मृतं शृणुयाद् [3]दर्भपुञ्जीलैः पलाशपत्रैश्च पुरुषाकृतिं कृत्वा संस्कुर्यात्॥ २॥

अथास्य मातादीनामन्यतममरणकाले सिकतासूपरि [4]दर्भावस्तीर्णासु दक्षिणशिरसं निषाद्य दक्षिणोत्तरयोः कर्णयोः 'आयुषः प्राणं संतनु' (तैब्रा. १.५. ७.१) इत्येतमनुवाकं[5] जपन्नासीताप्राणविमोक्षणात्। अथ प्राणोत्क्रान्तेषु स्त्रीभिर्यत्-कर्तव्यं तत्कृते औदुम्बरतरुमेनमारोप्याहतेनोदीचीनदशेन वाससा समुखं प्रच्छाद्या-हर्तारो निवीतिनो गृहादुपनि[6]ष्क्रम्यारण्ये वा नदीकूले हरन्ति सहाग्नियज्ञायुध-संभारैः। तत्राग्निरग्रे भवति, शवं पश्चात्, ततः संभाराः सर्वौषधादयः। तत्र श्लोकः-

॥ व्रीहियवाः प्रियङ्गवोऽणवो गोधूमास्तिलाः॥
माषाश्च सप्त श्यामाका[7]नीवाराश्च[8] गवीधुकाः[9]।
[10]वास्तानि गार्मुता[11] वेणुयवजर्तिलाश्चेति कुत्थे॥

पाणौ स्थानेऽष्टौ हिरण्यशल्काः[12], पात्री कंसश्चमसो[13] वा पूर्णाहुत्यर्थः, उदकादीनि पूर्णाहुत्यर्थानि, तदभिधानार्थमेकं पात्रं, प्रोक्षणीपात्रमुदकुंभ इति। तत्र क्वचिदरण्यां नद्यां वोदकसमीपे विस्रस्य वस्त्रादिना प्रच्छाद्य तूष्णीं शुद्ध्यर्थं स्नापयित्वा संस्कर्ता प्राचीनावीतं कृत्वा सर्वौषधमुदकुंभेऽवधाय दशहोत्रा[14] सग्रहेण पत्तोऽभिषिञ्चति। सर्वत्र होमे सग्रहा[15] इति शेषवचनाद् ग्रहेण यत्र यत्र होमो नास्ति तत्र सग्रहा होतारः प्रयोक्तव्याः। तृतीयषष्ठवर्जानां चतुर्णां होतॄणां 'वाचस्पते'

---

१. M Ad °हुति सह. २. M Ad °हुतिरामा°. ३. M दर्भापु°. ४. M Ad दर्भास्ती°. ५. M Ad °मनुवाकान्. ६. M Ad °पनिष्मूमर्यार°. ७. M Ad °क नी°. ८. M Ad °वारग°. ९. M Ad °धुता. १०. M Ad पास्त्वगार्मुतो. ११. M Ad गामृतो. १२. M Ad °शल्कपात्री. १३. M Ad श्यामसो. १४. M Ad °होत्रे. १५. M होता after सग्रहा.

(तैआ. ३.१.११) इत्याद्यनुवाकशेषा ग्रहाख्या:[१]। तृतीयस्य 'सोम: सोमस्य' (तैआ. ३.३.५) इत्यादि। षष्ठस्य 'भूर्भुव: सुव:' (तैआ. ३.६.७) इत्यादि, द्वौ षड्ढोतारौ चतुर्थषष्ठौ। तयोर्विषयविभागो विचारणीय:॥ ३॥

सर्वत्र होतृणां चतुर्थवर्जानां पञ्चानां प्रतिपदम् 'आसीद्' इत्यनुषजन्ति केचित्– 'चित्ति: स्रुगासीत्' (तैआ. ३.१.१), 'पृथिवी होताऽऽसीत्' (तैआ. ३.२.१), 'महाहविर्होताऽऽसीत्' (तैआ. ३.५.१), 'वाग्घोताऽऽसीत्' (तैआ. ३.६.१), इत्येवम्। 'आस्ताम्' इति द्विवचनपदेषु '[२]अश्विनाऽध्वर्यू आस्ताम्' (तैआ. ३.३.२), 'अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरावास्ताम्' (तैआ. ३.५.५) इति कर्त्तव्यम्। क[[३]... इ]त्येवमाद्यनुषजन्ति। चतुर्थषड्ढोतृपदेषु 'श्रितम्' इति– 'सूर्यं ते चक्षु: श्रितं (तु. तैआ. ३.४.१) (वातं)[४] प्राण: श्रितम्' इत्येवं सर्वत्रानुषङ्गं केचिदिच्छन्ति। यथा 'इषे त्वा' इत्यादौ 'छिन्द्याद्'इति[५] पदम्। अपठितं न प्रयुज्यते तथाऽत्रापीत्ययमेवास्माकमागम:॥ ४॥

सिग्वातवीजनमपि[६] केचित्कुर्वन्ति। आचार्येणापीष्टमिति। यत एवमाह– '[७]यमं धायमियातैनं धुन्वामहा' इति यमं धुन्वन्तीति च महामेधे चाम्नानादाचार्येण। यस्य विधिमनभिधाय लेशेन प्रदर्शनमिति विकल्पेन कुर्वन्त्यन्ये। सिग्वातपक्षे तस्येतिकर्तव्यताविधि: सापेक्षत्वाद् बौधायनीये ग्रहीतव्य:। [८]['तं बान्धवा:] सिग्वाते[नोपवीजयन्तस्त्रि-][८]रपसव्यं परियन्ति– 'वातास्ते वान्तु पथि पुण्यगन्धा: मन:शुभा गात्रशुभा अनुलोमा:। त्वच:सुखा मांससुखा अस्थिसौख्या वहन्तु त्वा मरुत: सुकृतां यत्र लोका:' (बौधापितृ. ३.२.३) इति। यथेतं पुन: (त्रि:)[९] परियन्ति। एवं पथि चितायाम्। चितायामित्येवेत्येके' इति॥ ५॥

अनाम्नात[१०]मृतस्यापि तस्यादृष्टार्थं सिग्वाता कर्तुमकर्तुमयुक्तमित्याद्यस्याभावात्, सिग्वाता द्वित्वाभावात्, पथि चाभाव इत्येवं मन्यमाना अस्मदीया: केचिदन्त्यमेव कुर्वन्ति। तस्यैवासंभव इति गृहे स्नापितस्याप्यन्ये कुर्वन्ति। यत्र स्नापितं तं मन्यमाना अस्मदीया: वस्त्रेण प्रच्छाद्य रक्तैर्गन्धपुष्पैरलंकृत्य 'यत्रेमां दिशं दक्षिणां प्रतीचीमुदपात्रो निनीत: प्रास्यन्देत तदु दहनस्य वा श्मशानकरण-

---

१. M Ad गृह्याख्या:. २. M Ad अश्वानध्व°. ३. M Ad क...त्ये. ४. M Ad om. ५. M Ad °द्यादि पद°. ६. M Ad सिग्वातपी जन°. ७. M Ad यन्धामि यातैनं. ८-८. M Ad ग्रहीतव्य:...ञ्चो वा राज्यसिग्वाते...रपसलै:, cf *Baudh. PS* 3.2.3-7. ९. M Ad om. १०. M Ad . . . माम्नामृत° (?).

स्ये 'त्यन्वाख्याने (अन्वा. ४.७७.७) विहितं दहनक्षेत्रं हरन्ति। सर्वत्र हरणे निर्वातत्वमेव हृत्वा[१] शवं[२] दक्षिणाग्रेषु दर्भेषु निषाद्य तस्य पुरस्तात् संभारान्निदधाति, दक्षिणतः पात्राणि पश्चादग्निम्, सर्वमग्निसमीप एव वा। तत्रोद्धननावोक्षणे [३]व्युदजनात् पूर्वं कुर्वन्ति। तथा महामेधे दृष्टमिति[४]। शकुनानि हननरज्जुवेष्टनतण्डुलापूरणा-दीहानूक्तमपि परसूत्रदृष्टं केचित् कुर्वन्ति॥ **६॥**

तदयुक्तम्, अपेक्षाभावात्। अपेक्षासंभवे परसूत्रदृष्टस्य ग्रहणं युक्तम्। व्युदजनमत्र।[५] 'अस्मै' इत्यत्र प्रेतनाम चतुर्थ्यन्तं निर्दिशति। तदत्र[६] दक्षिणपूर्व-मवान्तरदेशं चतुःस्रक्तिं ताभिराखरं कल्पयन्ति। केचिदत्रोद्धननावोक्षणव्युदजनादि कुर्वन्ति। सकृदेवोदकुंभपरिषेचनम्। सकृदेव कुंभबिलेन पात्रसादनकालेऽग्निं पितृवत्परिस्तीर्य तस्य दक्षिणतो दक्षिणाग्रान् दर्भानास्तीर्य तेष्वेतानि पात्राणि सादयत्येकैकशः। तानि पूर्णाहुत्यर्थपात्रीकं सचमसानामन्यतममपिधानं च मृण्मयादि प्रोक्षणीपात्रं च यज्ञायुधानि च हिरण्यशल्काश्च पूर्णाहुत्यर्थानि चोदकादीनि। तत्र पात्री स्रुगाकारा। ततः पितृवदेकपवित्रेण प्रोक्षणीः संस्कृत्य सकृदेव सर्वाभिः प्रोक्षणीपात्रियामिति प्रदर्शनत्वात्। तदभावे कंसचमसयोरन्यतरेऽपि यथाक्रममिति॥ **७॥**

अथ पूर्णाहुतीः। उदकं दधिव्रीहियवा आज्यमित्येतदनुजानाति। ततोऽनेन क्रमेण प्रोक्षणार्थमेव सपवित्रमन्तर्धाय एतानि समानयति। सप्तहिरण्यशल्कप्रासनम् आस्यनासिकाचक्षुःश्रोत्रेषु, अनेन क्रमेण। ततो मनसि दशहोतारं व्याचक्षीत, वाचि चतुर्होतारं, चक्षुषि पञ्चहोतारं, श्रोत्रे षड्ढोतारं, कीक[७]सासु सप्तहोतारमि-त्यनेन क्रमेण। होतृव्याख्यानं सग्रहेण पृथग्गतः होमाभावात्। 'चित्तिः स्रुग्' (तैअ. ३.१-५) इत्यादयः पञ्चानुवाका यथाक्रमम्। दशहोत्रादयो मनसि हृदये वाच्यास्ये चक्षुषोरित्यर्थः॥ **८॥**

तयोर्युगपदेव तथा श्रोत्रे कीकसासु[८] च दर्भैरन्वारभ्य व्याख्यानम्। स्कन्धगु-दार्जवे पार्श्वस्थान्यस्थीनि कीकसा[९] उच्यन्ते। 'अग्निर्यजुर्भिः' (तैआ. ३.८.१-२१) इत्यनुवाकः संभाराख्यः। 'सेनेन्द्रस्य' (तैआ. ३.९.१-२०) इति पत्न्याख्याताभ्यामग्निः पुरस्ताज्ज्वलयति सविता ज्वलनात्पूर्वम्। ज्वलयित्वा सकृदेवात्राप्युदकुंभं परिषिञ्चति। 'वाग्घोता' (तै.आ.३.६.१-७) 'ब्राह्मण एकहोता'

---

१. Ad हुत्वा. २. M Ad शव. ३. M Ad प्युद°. ४. M Ad दृष्टि°. ५. M Ad °मत्रेऽस्मा. ६. M Ad तत्र. ७. M Ad किकटा°. ८. M Ad कीकटा°; thus *ĀgniGS* 3.4.1 : 136.3. ९. M Ad कीकटा.

(तै.आ.३.७.१–१०) इत्यनुवाकाभ्यामग्निमुपस्थाय सम्यग् दत्त्वाऽरण्यात्[१] निर्गच्छन्ति। 'न पुनर्' इत्यादि, 'मा तरत' इति तत्रस्थाः प्रतिब्रूयुः। तत्रोदकक्रिया बौधायनीये (बौधापितृ.३.४.१६) द्रष्टव्याः[२]। कथं केशान् प्रकीर्यैकवाससो दक्षिणामुखाः सकृदुपमज्ज्[३]योत्तीर्योपविशन्ति[४]। बद्धशिखा[५] यज्ञोपवीतिनोऽप आचम्य प्राचीनावीतं कृत्वा दक्षिणाग्रान् दर्भान् संस्तीर्य दूर्वामञ्जलिनोदकमानीय (सव्यं जानु निपात्य)[६] तेषु दक्षिणामुखास्तिलमिश्रा अपः प्रयच्छन्ति– 'असावेतत्त उदकम्' इति। एवं द्वितीयं तृतीयं (च)[७] कृत्वाऽप्रतीक्षा[८] ग्राममायन्ति ह्येभूताः कनिष्ठप्रथमा इति। अथात्रैवोक्त[९]मक्षारलवणमधःशयनमादशरात्रात्[९]। सायंप्रातस्तूष्णीमुपले पिण्डं निपृणुयात् सकृदुदकक्रिया। अथैषा पत्नी नाश्नीयात् पक्वान्नमादशरात्रात्। दशमेऽहनि त्रिरुदकक्रियां कृत्वोत्सीदन्ति सर्वेऽमात्या इति। तत्रोदकक्रियामन्ते 'असौ' इत्यत्र प्रेतनामामन्त्रितत्वेन निर्दिशेत्। तत्राद्यस्तमयोरह्नोस्त्रिरुदकक्रियाऽन्यत्र सकृत्। सर्वत्र सकृदेव चात्रावृत्तेरश्रुतत्वादिति केचित्। 'प्राचीनावीतिनोऽमुक्तशिखा' इति गौतमे वचनात्। यज्ञोपवीत्यप आचम्य[१०] प्राचीनावीतं कृत्वा मुक्तशिखाः सव्यं जान्वाच्य उदकक्रियां कुर्युः। उपांशुग्रहणं हिरण्यमश्माग्नी चेत्यत्र चकारकरणादुदकमुप-स्पृश्योपस्पृश्याग्न्यादीनि [११]स्पृष्टव्यानि। भार्यासंज्ञितानारी पुरुषो ब्राह्मणसंज्ञितः [१२]तयोरप्यनेन होतृसंस्कारेण संस्कुर्वन्ति॥ ९॥

इति चतुर्थाध्याये पञ्चमः खण्डः

---

१. M Ad अरण्या. २. cf *Baudh.PS* 3.4.16-17. ३. M Ad °मज्यो°. ४. M Ad °शति. ५. M Ad बन्धशि°. ६. M Ad om. ७. M Ad om. ८. M Ad °प्रतीक्ष्य, cf *Baudh.PS* 3.4.19. ९-९. M Ad °त्रैवोक्त अथैवणमधः°. १०. M gives the indication of the close of *khaṇḍa*, here, and H^2 on p.23, line 15 but Ad does not show it. ११. M Ad प्रष्टव्यानि. १२. cf *Baudh. PS* 3.5.1.

अथ चतुर्थाध्याये षष्ठः खण्डः

[1]अथेतरो दहनविधिः

अथेतरो दहनविधि[2][:व्याख्यास्यामः॥ १॥

अन्वाहार्य][2]पचनार्थमुदकुंभश्च हिरण्यशल्काश्च वैकंकत्यौदुम्बर्यौ शाखे चौदुम्बरी[3] वा पालाशी[4] वा पात्री[5] कꣳसश्चमसो वा॥ २॥

पूर्णाहुत्यर्थमुदकं दधि व्रीहियवा आज्यमिति॥ ३॥

एते अस्य संभारा उपक्लृप्ता भवन्ति॥ ४॥

अथैतं प्रेतमरण्ये वा [6][नदीकूले वा हरन्ति सहाग्नियज्ञायुधसंभारैः ॥ ५॥

तत्र क्वचिदरण्यां नद्यां वोदकसमीपे विस्त्रस्य वस्त्रादिना प्रच्छाद्य तूष्णीꣳ शुद्ध्यर्थं स्नापयित्वा सꣳस्कर्ता प्राचीनावीतं कृत्वा][6] पुनःसर्वौषध-मुदकुंभेऽवधाय दशहोत्रा पत्तोऽभिषिञ्चेत्॥ ६॥

आयतनमागत्य 'अपेत (वी)[7]त' (तैसं. ४.२.४.१) इति द्वाभ्याꣳ शाखाभ्यां दक्षिणापवर्गमपमृज्याद्भिः प्रोक्ष्य दक्षिणावनतं, पश्चादवनतं वाऽऽयतनं करोति॥ ७॥

एतन्मध्ये हिरण्यशल्कमवधाय सकाष्ठां दर्भस्तम्बमुपधाय दक्षिणा-प्राचीं चितामुपदधाति[8]॥ ८॥

दक्षिणतः[9]पुरस्तादारभ्योदकुंभꣳ सकृदेवापसलैः परिषिच्य प्रतिपदमा-

---

१. The text dealing with another type of दहनविधि is given in M^1 on page 25, line 16, H^1 p.48, line 1 and H^2 p.23, line 15 onward, but not found in M and Ad; H^2 अथैत°; thus M^1 H^1. २-२. M^1 H^1 विधि...पचननार्थं, H^2 विधि...नार्थं°. ३. M^1 H^1 H^2 °दुम्बरीं. ४. M^1 H^1 H^2 °लाशीं. ५. M^1 H^1 H^2 पात्रीं. ६-६. M^1 H^1 °रण्ये वा...नस्सर्वौ°, H^2 °रण्येवा...पुनस्सर्वौ°; For the text under bracket see *infra* under दहनविधिप्रयोग ४.५.६. ७. M^1 H^1 °पेततेति, H^2 धामि ८-८. M^1 H^1 °धामि...तत्पु°, H^2 धामि...दक्षिणतःपुर°.

गत्योदकुंभं निधाय तस्मादेवारभ्य दक्षिणाग्रान् प्रत्यगग्रान् वा दर्भान् सꣳस्तीर्य दक्षिणतो दक्षिणाभिमुखः पात्राण्येकैकशः सꣳसाद्य पात्रियामेकपवित्रं निधाय[१] प्राणायनेषु प्रत्यस्य कैश्चिद् दर्भैरन्वारभ्य यथास्थानꣳ[२] होतॄन् व्याचष्टे मनसि दशहोतारं, वाचि चतुर्होतारं, चक्षुषि पञ्चहोतारꣳ, श्रोत्रे षड्ढोतारं, कीकसासु[३] सप्तहोतारम्॥ ९॥

अथ 'इदं त आत्मनः[४](शरीरमयं ते आत्मा आत्मनस्त आत्मानꣳ शरीराद् ब्रह्म निर्भिनद्मि भूर्भुवः सुवरसौ स्वर्गाय लोकाय स्वाहा')[४] **इति पूर्णाहुतिं हुत्वा संभारैः [५]....ब्राह्मण(ाभ्याम्)[५] एकहोतृभ्यामग्निमुपस्थायारण्यान्निर्गच्छन्ति** 'न पुनरागमिष्यामहे' **इति॥ १०॥**

'मावतरत' **इत्यन्ये प्रतिब्रूयुः॥ ११॥**

अथ तीर्थेऽपोऽभ्येव[६] यन्ति ज्ञातयः॥ १२॥

उदकक्रियां कृत्वा ग्रामं प्रविश्य गृहद्वारस्थम[७]श्मानमुपांशुग्रहणमग्निमुदकं चोपस्पृश्य दक्षिणदेशे[८] [तूष्णीं] पिण्डं[दत्त्वा][८] सायंप्रातरुदकक्रियां कृत्वा पिण्डं दद्यात्॥ १३॥

दशमेऽहनि पिण्डविशेषं कुर्यात्॥ १४॥

एकादश्यामेकोद्दिष्टं कुर्यात्॥ १५॥

इति चतुर्थाध्याये षष्ठः खण्डः

---

१. M^1 H^1 H^2 ०धाय...प्राणेषु. cf *infra* ४.४.३२. २. M^1 H^1 होतुरस्याचष्टे; thus H^2. ३. M^1 H^1 H^2 कीकटासु; thus *ĀgniGS* 3.4.1 : 136.3, cf *ĀsvŚS* 12.9.11-12. ४-४. M^1 abri, see *ĀgniGS* 3.10 : 171.5. ५-५. M^1 H^1 संभारै...ब्राह्मण, H^2 संभ...ब्रा०. ६. M^1 H^1 ०पोभ्यो: व्यन्ति, H^2 ०पोवोभ्य. ७. M^1 H^1 H^2 ०द्वारस्थान्यश्मा०. ८-८. M^1 H^1 H^2 देशे पिण्ड...त्सायं.

अथ चतुर्थाध्याये सप्तमः खण्डः

[1]अथानुपेतोन्मत्तादिदहनविधिः

अनुपेत उन्मत्तो मूको जळोऽन्धो बधिरः षण्डः कुष्ठी किलासः खञ्जः कुब्जः कुणिर्व्यसनी हीनाङ्गोऽधिकाङ्गः सभागतोऽनाथो ब्राह्मणो राज[2][न्योऽनग्निर्गृहस्थो वैश्यस्य स्त्रियामुत्पन्नपुत्रो][2] विधवा कन्या वन्ध्येत्येता एकर्चविधिना संस्कुर्यात्॥ १॥

वृत्तिः—अनुपेत्त उन्मत्तो[3] = एकर्चा विधिना संस्कुर्यात्। तत्र प्रयोगः। तूष्णीं स्थापयित्वा सिग्वातादि पूर्ववत्कृत्वा श्मशानदेशं नीत्वाऽऽयतनमेत्यावोक्ष्य मन्त्रेण गां व्युदस्य[4] हिरण्यशल्कान् निधाय चितां कल्पयित्वा प्रेतमारोप्य, हिरण्यशल्कान् प्रत्यस्य वा॥

पूर्णाहुतिञ्जुहुयाद्—'इदं त आत्मनः शरीरम् [5](अयं त आत्मा आत्मनस्त आत्मानं शरीराद् ब्रह्म निर्भिनद्मि भुर्भूवः स्वरसौ सुवर्गाय लोकाय स्वाहा')[5] **इति॥ २॥**

'अस्मात् [6]त्वमधि जातोऽस्ययं त्वदधिजायताम्। अग्नये वैश्वानराय सुवर्गाय लोकाय स्वाहा' (तैआ. ६.४.१७) **इति दहन्ति**[7]**॥ ३॥**

---

१. The text dealing with अनुपेतोन्मत्तादिदहनविधि is found in M^1 p.26, line 17, H^1 p.50, line 6 and H^2 p.24, line 20 onward and its *Vṛtti* on 1st Sūtra in M p.527, line 1-3 and Ad p.1024, line 3-7 along with the enitre text of first Sūtra in abridged form : अनुपेत उन्मत्तो (=) एकर्चा संस्कुर्यात् विधिना. २-२. M^1 H^1 H^2 राज...वन्ध्या (for विधवा). ३. M Ad abri. ४. M Ad व्युदज. ५-५. M Ad abri. ६. M Ad °स्माञ्चधि°; thus H^1. ७. H^1 ददन्ति.

'वसुभ्यो[१] रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्योऽद्भ्यः पितृ[२][भ्यः स्वधा नमः स्वाहा' (तु. तैसं. ३.५.६.६) **इति वा][२]॥ ४॥**

[३]अत्रैव सिग्वातेनोपवीज्योत्तपनीयेन तूष्णीं पूर्णाहुतिं जुहुयात्॥ ५॥

गृहीत्वाऽत्रैवोदकुम्भेन परिषिच्य तीर्थे स्नात्वा तूष्णीमुदकक्रियां यथोक्तं कृत्वा एकोद्दिष्टं च यथोक्तं करोति॥ ६॥

यत्रेमां दिशं दक्षिणां प्रतीचीमुदपात्रो निनीतः प्रस्यन्देत तदु दहनस्य वा श्मशानकरणस्य वेत्येवंगुणविशिष्टं बलिहरणं क्षेत्रं पिण्डदानक्षेत्रं च॥ ७॥

अत्र केनचिदाम्नातः पिण्डदानविधिरस्ति सौत्रः पठ्यते॥ ८॥

॥ [४]इत्यनुपेतोन्मत्तादिविधिः समाप्तः[४]॥

इति चतुर्थाध्याये सप्तमः खण्डः

---

१. H^1 वरुभ्यो. २-२. M^1 H^1 H^2 broken पितृ°...यहे and due to displacement of folio the text dealing with अस्थिचयनम् (M^1 p.27, line 3-10; H^1 p.51, line 1-13; H^2 p.25, line 4-14) has wrongly come here after broken text. That has been shifted at its proper place, see fn. 1, p.96. ३. The text beginning with अत्रैव and ending with सौत्रः पठ्यते (M p.524, line 7-13; Ad p.1024, line 1 - p.1125, line 6) is given in continuation with the preceding text. It is not found in M^1. ४-४. M इति उन्मत्तविधिः, Ad इति उन्मतविधिः समाप्तः.

अथ चतुर्थाध्यायेऽष्टमः खण्डः

[1]अथ अस्थिचयनम्

[2][द्वियहे त्रि]यहे चतुरहे पञ्चाहे सप्ताहे वाऽनुगतेऽग्नावौदुम्बरं शङ्कुमामपात्रमित्यादाय[3] श्मशानं गत्वौदुम्बरेण शङ्कुनाऽस्थीनि सञ्चिनुयात्– 'भूः' इति पाद्यानि[4], 'भुवः' इति मध्यानि, 'सुवः' इति शीर्षण्यानि॥ १॥

पयोऽभ्यक्ते ऽस्थिकुंभे [5]घृतञ्जुहुयात्– 'इदं त आत्म[6][नः शरीरमयं त आत्मा आत्मनस्त आत्मानं] शरीराद्[6]ब्रह्म निर्भिनद्मि[7] 'भूर्भुवःसुवरसौ स्वाहा' इति॥ २॥

तं पुरुषमात्रं खात्वा 'भूर्भुवःसुवः' इत्यवदधाति॥ ३॥

चतुर्होतॄन् व्याचष्टे। यावत् तिष्ठति तावल्लोके महीयते[8]॥ ४॥

[इत्यस्थिचयनम्]

इति चतुर्थाध्यायेऽष्टमः खण्डः

---

१. The text dealing with अस्थिचयनम्, due to displacement of folio, is found wrongly given amidst अनुपेतोन्मत्तदहनविधि in M^1 p.27, line 3, H^1 p.51, line 1 and H^2 p.25, line 4 onward, see fn 1 on p.94. It is not found in M and Ad. २. M^1 H^1 H^2 broken. ३. M^1 H^1 त्यादय; thus H^2. ४. H^2 पद्यानि; thus M^1 H^1. ५. M^1 H^1 कुंभेतञ्जु°; thus H^2. ६-६. M^1 H^1 आत्मा...ब्रह्म, H^2 आत्मन...राद्ब्रह्म. ७. M^1 H^1 °निर्भरद्धि, H^2 निर्भनमि. ८. Due to displacement of folio in the text beginning with 'न म्रियमाणं' and ending with 'भजामह इति' has wrongly come here after महीयते in M^1 p.27, line 9-10, H^1 p.51, line 10-14 and H^2 p.25, line 11-14. It has been shifted to its proper place before दहनविधि; see fn 1 on p.74.

अथ चतुर्थाध्याये नवमः खण्डः

[1]अथ मृतबलिहरणम्

॥ अथातो मृतबलिं व्याख्यास्यामः॥ १॥

॥ तीर्थे स्नात्वोदकक्रियां कृत्वा गृहं प्रविश्य गृहमध्ये कस्मिꣳश्चिच्छुचौ देशे दक्षिणप्रत्यक्प्रवणं दक्षिणप्रवणं वाऽऽखरं[2] कल्पयित्वा[3] दक्षिणमुखः सव्यं जा[4]न्वाच्योपविश्य प्राचीनावीती[5] तस्मिन्नुपरि दक्षिणाग्रान् दर्भान् [6]सꣳस्तीर्य तेषूदकुंभ[7]मपसव्यं परिषिच्य गन्धपुष्पधूपदीपैरर्चयित्वा कस्मिꣳश्चित् पर्णमये[8] पात्रे तैलोपस्तीर्णाभिघारितं मुष्टिमात्रमोदनं[9] पिण्डमादाय '[10]असावेतत्तेऽन्नम्' इति दत्त्वा पुनरपि तिलोदकमपसव्यं परिषिच्य [11]मनसैव प्रेतं निर्दिशेत्॥ २॥

वृत्ति–अथातो बलिहरणं व्याख्यास्यामः। तीर्थे = [12]पिण्डमादाय देवदत्ताय यज्ञदत्ताय इत्येवमादिभिर्नामधेयैः सम्बन्ध्य 'एतत्तेऽन्नम्' इति दत्त्वा पुनरपि तिलोदकमपसव्यं परिषिच्य मनसैव प्रेतं विसर्जयेत्॥

॥ एवमेवादशरात्रं[13] कुर्यात्॥ ३॥ इति॥

वृत्ति–एवमेव सायंप्रातरादशरात्रं कुर्यात्॥

॥ इति मृतबलिहरणम् समाप्तम्[14]॥

इति चतुर्थाध्याये नवमः खण्डः

---

१. The text dealing with मृतबलि is given in M^1 p.27, line 11-18, H^1 p.52, line 1-2 and H^2 p.25, line 16 and its *vṛtti* in M p.524, line 16-20 and Ad p.1025, line 8-13 with वृत्ति. २. M^1 H^1 वाखं; thus H^2. ३. M^1 H^1 H^2 कत्वयि°. ४. H^2 जन्वा°. ५. M^1 H^2 °वीति. ६. M^1 H^1 परिस्ती°; thus H^2. ७. M^1 H^1 युदकुंभ; thus H^2. ८. M^1 H^1 पात्रमये, H^2 पत्रमये. ९. H^1 मात्रोद°; thus M^1 H^2. १०. M^1 °दाय सावे°; thus H^1 H^2. ११. M^1 H^1 मानसैव; thus H^2. १२. M Ad sign of abri text of above *sūtra* not given. १३. M^1 °मेव दश°, H^2 दश्वपात्रं; thus H^1. १४. M om; thus T.

अथ चतुर्थाध्याये दशमः खण्डः

[1]अथैकोद्दिष्टविधिः

[2]एकादश्यामेकोद्दिष्टं कुर्यात्[2]॥ १॥

एकोद्दिष्टं [3]करिष्यन्नुपकल्पयते॥ २॥

केशश्मश्रुलोमनखानि वापयित्वा नवं पात्रमाज्यं तृणमुष्टिमाञ्जना-भ्यञ्जने सूत्रमिति॥ ३॥

धनधान्यपात्रं दक्षिणामुखः सकृदुपस्पृश्य स्नात्वा दक्षिणतो गृहाणां गोमयेन गोचर्ममात्रꣳ स्थण्डिलमुपलिप्य प्राचीनावीतं [4]कृत्वैकपवित्रं कृत्वा नवं पात्रमादाय तस्मिँस्तिरःपवित्रमप[5] आनयति॥ ४॥

अर्घोदपात्रम्। 'अर्धः पितृणामि'ति ब्राह्मणम्॥ ५॥

दक्षिणाग्रान् दर्भान् सꣳस्तीर्य तेषूदपात्रं निधाय तिलानावपति पात्रं गन्धपुष्पधूपदीपैरलंकृत्य॥ ६॥

अथ ब्राह्मणं क्लृप्तलोमनखं यथाशक्त्य[6] [-धनधान्यपात्रं संस्पृष्ट्वा देशे पात्राणीत्यादि दत्त्वा], दर्भोपहितमासनम् 'आसनम्' इत्युक्त्वोदङ्मुख उपवेश्य[6] तस्याग्रेण दक्षिणामुखः॥ ७॥

अथ [7]सिकता ओप्य[7] दक्षिणाग्रान् दर्भान् सꣳस्तीर्य तेषूपस्तीर्णाभि-घारितं पिण्डं कृत्वा तं ब्राह्मणं दृष्ट्वा 'पिण्डं[8] निवपामि' इत्याह॥ ८॥

---

१. M^1 H^1 H^2 do not give the title, but both M and Ad give it. The original text in *sutra* -form is given in M^1 on p.28, line 1-20, H^1 p.52, line 14- p.55, line 8 and H^2 p.26, line 10- p.28, line 6. २-२. This text is found in M p.518, line 2, Ad p.1014, line 9 as एकादश्यामेकादिष्टं°, but absent in M M^1 H^1 H^2. ३. M^1 H^1 कल्पयन्नु°; thus H^2. ४. H^2 कत्वै°; thus M^1 H^1. ५. M^1 H^1 पवित्रमान°; thus H^2. ६-६. H^2 यथा... दर्भोपहितमासन-मित्युदङ्मुख° H^2 यथा...त्यदर्भोवहितमासनमित्युक्त्वोद°. ७-७. M^1 H^1 सिकतो दर्व्यः; thus H^2. ८. M^1 H^1 पिण्डं निव°, H^2 पिण्डान्निव°.

'पिण्डं[१] निवप' **इत्युक्तो**[२] 'अयमोदनः का[मदुघोऽस्त्वनन्तोऽक्षीयमाणः' **इति दर्भेषु पिण्डं निदधाति।**] [२]०सुरभिः सर्वकामी। स त्वोपतिष्ठत्वजरो नित्यपूतः स्वधां दुहाना [३]अमृतꣳस्तर्पयन्त्वसौ' **इत्येकं पिण्डं दत्त्वा॥ ९॥**

अथाञ्जनाभ्यञ्जने वासस्तूष्णीं दत्त्वा॥ १०॥

अथैतां पात्रीं निर्णिज्य संक्षालनेनापसव्यं परिषिञ्चति[४]– 'ऊर्जस्वतीः स्वधया वन्दमान[स्ते श्रयन्तीः स्योना][५] ऊर्जं वहन्ती स्व[६][धा]मक्षितोदकाः क्षीरमुदकं घृतं[७] मधु पयः कीलालं परिस्रुतम्' **इति॥ ११॥**

अथाप उपस्पृश्य तिलोदकं प्रदाय॥ १२॥

अथैतां पात्रीं निक्षिप्योदकं प्रदाय॥ १३॥

अथैतां पात्रीं निक्षिप्याभिघार्याङ्गुष्ठमूलमुपसंगृह्याभ्य[ज्य.... उत्]सृज्य[८] **[९]भोजयित्वाऽन्ते तिलोदकं प्रदाय॥ १४॥**

वृत्तिः–[१०]अत्र पात्रीं निक्षिप्येति न्युब्ज्येत्यर्थः। अङ्गुष्ठमूलमभिघार्य तेन भोजनपात्रे भोजनार्थम् ओदनपात्रे वाऽभ्यनक्ति। हिरण्मयादिना भोजनपात्राणामभावे पर्णेन वेति उदपात्रं तिलपात्रम्[१०]॥

तृतीयं शुद्धोदकं प्रदाय पूर्ववत् परिसमूह्य गोमयेनोपलिप्य दक्षिणाग्रेषु दर्भेष्वन्नशेषेणावकीर्य॥ १५॥

अथ पवित्रं विसृज्य[११] **दक्षिणतोऽन्नस्य**[१२] **ततोदकं** [१३]**निनीयोदपात्रम् उत्सृज्यानवेक्षमाणं**[१४] 'स्वधाऽस्तु' इ[१५][**त्युच्चैरुक्त्वा** 'अस्तु स्वधा' **इति प्रतिवचनम्॥ १६॥**

---

१. M[1] H[1] पिण्डं निवपे०, H[2] पितॄन्निवपे०. २-२. M[1] H[1] ०क्तोयमोदनः का...सुरभि०, H[2] ०क्तो य ...सुरभिः. ३. H[2] अमृताꣳस्त०. ४. H[2] ०षिच्य=ऊर्जं. ५. M[1] H[1] ०मन्दमान...ऊर्जं. ६. M[1] स्व...मक्षि०, H[1] स्वमक्षि०, H[2] वहन्ती स्वयमक्ष्तितोदकाः; thus *ĀgniGS* 3.11:177.1. ७. M[1] H[1] घृत. ८. M[1] H[1] गृह्याभ्य...त्सृज्य, [H[2] नावृज्ये]. ९. H[1] योजयि० त्वान्ते, H[2] ०त्वा चान्ते. १०-१०. The वृत्ति on this *sūtra* has been given in M and Ad while giving प्रयोग of एकोद्दिष्ट on p.525, line 5-7 in M and p.1026, line 5-8 in Ad. ११. Cf *ĀgniGS* 3.11.2: निधाय. १२. M[1] H[1] H[2] ०न्यस्य. १३. M[1] निमीय. १४. M[1] ०माणा. १५. M[1] H[1] H[2] broken ०स्त्वि...दक्षिणा०; for broken text see *ĀgniGS* 3.11: 177.14-15.

यज्ञोपवीत्यवोक्ष्य][1] दक्षिणां [2]दक्षिणाभिश्च दत्त्वा दक्षिणमंसमन्वा-रभ्योत्थाप्योपनिष्क्र[3]मयति। तं प्रदक्षिणं कृत्वा शेषमनुज्ञाप्य[4] प्रतीक्षेत्॥ १७॥

गृहान् प्रविश्य सुस्नातः कृतमङ्गलो ब्राह्मणानन्नेन परिविष्य पुण्याहꣳ स्वस्त्यृद्धिम् इति वाचयित्वाऽन्नशेषं सगणः[5] प्रा[श्नीयात्]][6]॥ १८॥

इति चतुर्थाध्याये दशमः खण्डः

---

१. M^1 H^1 H^2 broken ०स्त्वि...दक्षिणा०; for broken text see *ĀgniGS* 3.11: 177.14-15. २. H^1 broken. ३. H^1 ०क्राम०. ४. H^1 repeats तं प्रदक्षिणं कृत्वा शेषमनुज्ञाप्य निष्क्रमयति प्रतीक्षेत्; thus M^1. ५. M^1 सगुण; thus H^1 om after शेषं, M^1 broken after प्रा०. ६. M^1 broken. Due to displacement of folios in M^1 from p.29, line 1, H^1 p.55, line 8 and H^2 p.28, line 6 onward the text of *VādhŚS* begins, and the remaining part of *Pitṛmedhsūtra* again begins in scattered form from page 1 in M^1 H^1 and H^2.

अथ चतुर्थाध्याये एकादशः खण्डः

[1]अथैकोद्दिष्टप्रयोगः

एकोद्दिष्टं [2]करिष्यन्नुपकल्पयते[3] = सगणः प्राश्नीयात्।

अत्र प्रयोगः। ब्राह्मणमामन्त्रयेत- 'एकोद्दिष्टे[4] क्रियाताम्' इति। [5](केशश्मश्रुलोमनख)वपनाननन्तरं[6] दन्तधावनाभ्यञ्जनादि दत्त्वा स्नापयित्वा गृहं प्रवेश्य धनधान्यपात्रं स्पृष्ट्वा स्वयं चाप्लुत्य ब्राह्म[णमुदङ्मुपवेशयेत्।][7] दक्षिणपार्श्वे सिकताभिराखरं कल्पयित्वा[8] तस्यैकस्मिन् भागे नवं पात्रम् इत्यादीनि सपात्राण्येकैकं सादयित्वा पितृवत् प्रोक्षणीः संस्कृत्य सकृदेव प्रोक्ष्य तदेव पवित्रमन्तर्धाय नवे पात्रेऽप आनीय तत्रैव स्थण्डिले दक्षिणाग्रेषु दर्भेषु सादयित्वा तिलानोप्य तदलंकृत्य ब्राह्मणं चालंकृत्य उपवेश्य खरस्यान्यभागे तृणमुष्टिं दक्षिणाग्रमास्तीर्य तत्र यथोक्तं पिण्डं दत्त्वाऽञ्जनादीनि च दत्त्वा संक्षालनेन परिषिच्याथाप उपस्पृश्य [9]तिलोदकमादायेत्यादि प्रतिपद्यते। तत्र श्राद्धाभिमर्शन-मिष्यते। तत्र पितृपितामहप्रपितामहशब्देषु प्रेतशब्दं निर्दिशति। तत्रोदकं निनयेत। तिलोदकं ब्राह्मणमुपनिष्क्रमय्यागत्य सिकता बर्हिः पिण्डमित्येतदप्सु[10] निक्षिपति तत्र शंखौ अनेन विधिना श्राद्धं कुर्यात्॥ १॥

प्रेतायैकादश्यामिति प्रतिपद्य कानिचित्प्रतिषिद्धानि-नात्राग्नौ कुर्यान्न निमन्त्रयेत। तदेव पूर्वं कुर्यान्न धूपदीपं न जपेन्न स्वधां वाचयेत्। शाकादिप्राकृतान्नभोजने कुर्यान्न पितृशब्द इति। यद्यपीह निमन्त्रणधूपदीपस्वधावचनानि प्रतिषिद्धानि तथापि

---

१. The text dealing with एकोद्दिष्टप्रयोग is given in M (p.525, line 7) and Ad (p.1026, line 8) onward. २. M^1 कल्पयन्. ३. The complete original text is given in M^1 H^1 and H^2; Here in M and Ad it is given in abridged form though without sign of it. ४. M एका°; thus Ad. ५. M Ad om. ६. M Ad °न्तर. ७. M Ad broken: ब्राह्म...दक्षि°. ८. M Ad कत्वयि°. ९. M Ad तिलोदा ' . १०. M Ad °त्येतप्सु.

दहनपक्षे वचनात् क्रियते। अत्रापि ब्राह्मणपरिवेषणवचनाभावाद् धूपदीपौ[१] न स्तः। नाभिश्रावणं न पूर्वं न दैवं न दीपो न स्वधा[२] न नमस्कारो नात्रापूर्वं सर्वं सिद्धम्। समानीय युग्मान् ब्राह्मणानुपवेश्य सर्वस्मात्सकृत्सकृदवदाय दक्षिणतो [३]भस्ममिश्रानङ्गारान्निरूह्य तेषु जुहुयात्[४] 'प्र प्रेतायामुष्मै यमाय च स्वाहा' इति। [५]तद्धुतमपात्रं च भवति। 'अमुष्मै तृप्तिरस्तु' इत्यपां प्रतिग्रहणं विसर्जनं च। अमुष्मा उपतिष्ठन्त्यनुदेशेष्वेव पिण्डदानम्। 'तृप्यस्व' इति संक्षालनं, 'तृप्तिरस्तु' इति विसर्जनम्, 'अस्तु तृप्तिः' इतीतरेषां प्रतिवचनम्। प्रेतस्याद्यप्रभृति[६] ब्राह्मणैरेकोत्तरवृद्धिरादशाहात्। अत्र नवं विच्छिन्द्येत[७]। एकादश्यां श्राद्धं तृतीये पक्षे, द्वितीयं सन्तमेकैकम्। नैकादशमासान्नयन्ति न द्वादशं मासमभ्यारोहन्ति। संवत्सरे सपिण्डीकरणं न [८]चाभिश्रावणं पूर्वं सदैवं सधूपं सदीपं सस्वधा नमस्कारं साप्तवम्। अथाप्युदाहरन्ति-

एकोद्दिष्टेन श्राद्धेन[९] नाग्नौ करणमिष्यते।
न चाभिश्रावणं कार्यं न च पूर्वं तु कारयेत्॥
प्रणवं न च कुर्वीत स्वधाकारं तथैव च।
ऊर्ध्वं संवत्सरात् प्रेतं पितृत्वमुपपद्यते॥ इति॥ २॥

तत्र सर्वस्मात्सकृत्सकृदवदायेति वचनात् सर्वपरिस्तरणानि कृत्वा मेक्षणस्य सादनप्रोक्षणसंमार्गान्[१०] करोति। सर्वमन्नं चाधिश्रित्य पर्यग्निकृत्वा शुद्धेनाज्येन [११]संस्तुतेनावाग्निस्थमभिघार्य उद्वास्य चाभिघारयति। गन्धपुष्पैरलंकृत्य समन्त-परिषेकं कृत्वा यज्ञोपवीत्येव हुत्वा पुनः परिषिञ्चति। 'अमुष्मै तृप्तिरस्तु' इति तिलोदकदानप्रतिग्रहणमन्त्रः। मन्त्रपक्षे 'प्रेताय वो गृह्णामि' इति तिलोदक-ग्रहणमन्त्रः।

'[१२]उदीरतामवर उत्परास उन्मध्यमः प्रेतः सौम्यः।
असुं य ईयादवृक ऋतज्ञः[१३] स [१४]नोऽवतु प्रेतो हवेषु॥'

'उदीरतामवरोत्परोन्मध्यमा प्रेता सौम्या।
असुं येयाद[१५]वृकर्तज्ञा [१६]सा नोऽवतु प्रेता हवेषु'॥

---

१. M Ad °दीपो. २. M Ad स्वधौ°. ३. M Ad भस्ममित्रान°. ४. M shows the end of *khaṇḍa*. ५. M Ad तध्वत°. ६. M Ad °स्याप्रभृ°. ७. M Ad °छिद्ये°. ८. M Ad °साभिश्रावणं. ९. M Ad श्राद्धेनाग्नौ. १०. M Ad °मार्गात्क°. ११. M °स्तुतेन, Ad °स्तुत्वेन. १२. M Ad उदीत्तमपर. १३. M Ad ऋतज्ञाः. १४. M Ad सन्नो. १५. M Ad येयायावकर्त°. १६. M Ad °तज्ञास्स नो.

इति स्त्रीप्रेते।

[१]**(आयाहि) प्रेत[२] सौम्य[३] गंभीरैः [४][पथिभिः पूर्व्यैः।**
प्रजामस्मभ्यं][४] ददद्रयिं[५] च [दीर्घायुत्वं च शतशारदं च॥ इति][६]

'प्रेता सौम्या गंभीरैः' इति स्त्रियाः प्रेतायाः।[७]

'अमुष्मै यमाय च स्वाहा' इति च, 'अमुष्यै तृप्तिरस्तु' इति च सर्वश्राद्धेषु[८] प्रयोगपक्षाः सन्ति। दहनपक्षे गृह्यपक्षस्तृतीयः पारिभाषिकः[९]। स चासमस्तविधानाद् [१०]न नातिन्तगृह्यपक्षः। अष्टकाविधिस्तत्र स्मार्तमसमस्तविधानादपेक्षासंभवात्। शंखविधिना वा निराकांक्षीक्रियते। शंखबौधायनपरिभाषोक्तविधयः क्रमेण वक्ष्यन्ते॥ ३॥

इति चतुर्थाध्याये एकादशः खण्डः

---

१. M Ad om. २. M Ad प्रेतः. ३. M Ad सौम्या. ४-४. M Ad broken. ५. M Ad न्ददद्रयिं दीदञ्च. ६. M Ad broken. °स्याप्रभृ°. ७. M Ad indicate the end of *khaṇḍa*. ८. M Ad °श्राद्ध्योः. ९. M Ad परिभा°. १०. M Ad broken.

अथ चतुर्थाध्याये द्वादशः खण्डः

[1]अथ सपिण्डीकरणप्रयोगः

[संवत्सरे सपिण्डीकरणं कुर्यात्।][2] परिधीन् परिधायेध्माधानादिव्याहृति-पर्यन्तं कृ[त्वा[3] कृत्स्]नं त्रिभिर्मन्त्रैः सव्यञ्जनस्यापूपस्य वाऽथवा त्रिषु पात्रेषूद्धृत्य प्रथमोद्धृतं प्रथमेन मन्त्रेणाभिमृश्य द्वितीयं द्वितीयेन तृतीयं तृतीयेन पितृप्रभृतिभ्यो ददाति। तथापास्तं भुक्तं सर्वमुत्तरेणाभिमृशेत्। तप्त्वा द्वा प्रतिपुरुषमभुञ्जाने यज्ञोपवीतं कृत्वा राक्षोघ्नान् [4]पैतृमेधिकमभिश्रावयति॥[5] १॥

ततः प्राचीनावीतं कृत्वा तानाचमय्यो[6]च्छिष्टमुद्धृत्यानुद्धृत्य वाऽन्नशेषेण भोजनस्थानेष्ववो[7]कीर्य तृतीयं तिलोदकं दत्त्वा यथास्मृति दक्षिणां ददाति। तूष्णीं केचित्। यथा 'दिव्या(य नमः[8]) (तैआ. १०.१६.९)' इति रहस्यपठितमन्त्रेण ददाति। ततो यज्ञोपवीत्युपग्रहणं कृत्वा उदकाञ्जलिं ददाति। केचिद् उदकाञ्जलिदानेन समाख्याय निर्देशान्नित्यमप्येते उदकाञ्जलयो दातव्या[9] इति। केचित्तिलोदकदानं न कुर्वन्ति। पक्षोऽयमापूर्विक उक्तः। पाकयज्ञपक्ष उच्यते। यज्ञोपवीत्यप आचम्य प्रणीतान्तमग्निमुखं कृत्वा निर्वपणाद्यन्तं पूर्वोक्तक्रमेण कृत्वाऽनुज्ञाप्य परिधिपरिधानाद्यग्निमुखं परिसमाप्य प्राचीनावीतं कृत्वा यथोक्तं पञ्चाहुतीर्हुत्वा यज्ञोपवीतं कृत्वा जयादिप्रतिपाद्य वास्तोष्पती वारुणीः प्राजापत्यां च हुत्वा पूर्वस्यैव स्विष्टकृतं हुत्वा पुनः परिषेकादिप्रणीतामार्जनान्तं पक्वहोमवर्जं पश्चाद्धोमं च परिसमाप्य पिण्डदानादि यथोक्तमुदकाञ्जलिदानान्तं करोति॥ इति॥[10] २॥

---

१. Due to displacement of folio the text dealing with सपिण्डीकरण is found in M (p.514, line 10) and Ad (p.1009, line 2). M^1 H^1 H^2 do not have this text. २. M Ad om. ३. M Ad broken °न्तमकृ...शनं. Here a big part of the text seems to have been broken; cf *ĀgniGS* 3.11.3 : 178, *Baudh.PS* 2.11.1-10. ४. M Ad पैतृकं...नभिश्रा°. ५. M Ad indicate the end of *Khaṇḍa*. ६. M Ad °मर्योच्छिष्ट°. ७. M Ad °नेष्ववाकीर्य. ८. M Ad om. ९. M Ad दातव्य. १०. M Ad indicate the end of the 6th *Khaṇḍa* इति षष्ठः.

स्थण्डिलकरणाद्याज्यसंस्कारान्तमग्निमुखं कृत्वा परिषिच्योपाकरणीये जुहोतीत्यादि प्रतिपद्यते। यज्ञोपवीतित्वं चातोऽपि मन्त्रस्याविकारः। समानविधिना होमशब्दस्य स्त्रीलिङ्गापेक्षया मन्त्रस्त्रीलिङ्गत्वममुयाक्षात्वेनासमर्थो विनाशितवृषण इत्यर्थः। वेहद् गर्भस्राविणीस्वभावा[१] इति प्रदीपः[२]। पात्रप्रोक्षणं निधाय ताभिः प्रोक्षति तूष्णीम्। द्वयमिह पूर्वविशेषणम्। प्रोक्षणी सन्तृद्य शृतेष्ववदानेष्ववदानेष्वा-सादितेष्वन्यत्र वा हविष्यसिद्धमोदनं चासाद्य ब्राह्मणभोजनादि द्वितीयाप्रदानान्तं पूर्ववत्कृत्वाऽनुज्ञाप्य वपाहोमादि प्रतिपद्यते। केचिदुपाकरणहोमात्पूर्वमेव ब्राह्म-णोपवेशनाद्यनुज्ञापनान्तं कृत्वा परिषेकादि प्रतिपद्यन्ते। सकृद्वेति विकल्पदर्शनात् त्रेधा विच्छेदस्याप्रतिखण्डं मन्त्रावृत्त्याऽऽहुतव्या इति। केचित् सकृदेवेत्यपरस्मिन्पक्षे क्रियाभ्यावर्तने दृष्टोऽपि सकृच्छब्देन प्रतिषेधः। इह सामर्थ्याद् भवतीति हि विचार्यः। इहौदुम्बरग्रहणं सर्वत्र पितृकार्यसंभाराणामौदुम्बरत्वद्योतनार्थम् इति पूर्वत्राप्यौदुम्बरा एव संभाराः सर्वेषां पश्ववदानानामन्नस्य च। सकृत्सकृदवदाय एकैकायामाहुतिं जुहुयादिति पञ्चैवावदानाहुतयः। अन्नस्यैव सौविष्टकृतीं[३] हुत्वा परिषेकादि-प्रणीतामार्जनान्तं पक्वहोमवर्जं कृत्वा पिण्डदानाद्युदकाञ्जलिदानान्तं पूर्ववत्करोति। केचिद् ब्राह्मणोपवेशनाद्यनुज्ञापनान्तं प्राक्परिधिपरिधानात् कुर्वन्ति॥ ३॥

केचित्पशोः स्थाने स्थालीपाकं कुर्वन्ति[४]। तत्र प्रयोगः। चरोः श्रपणस्थान एव चरुं श्रपयेत्। केचित् प्रतिनिधिप्रतिनिधेयधर्म इत्युपकरणस्थाने चरुं श्रपयन्ति। युक्तमत्त्वं विचारणीयम्। पक्षत्रयेऽप्युपाकरणीयामाज्येन जुहोति। उपाकरणमर्थलुप्तं प्रोक्षणं 'पितृभ्यस्त्वा जुष्टां प्रोक्षामि' इति चरोर्वपावदानहोमम्। अन्यत् सर्वं समानम्। [५]निमन्त्रितैः सहानिमन्त्रितेभ्योऽ[६]र्थित्वेनागतेभ्योऽनवगतेभ्यो दद्याद् इत्येतत्सर्वपक्षेषु समानम्॥ इति॥[७] ४॥

स्थण्डिलकरणाद्याज्यसंस्कारान्तं ब्रह्मप्रणीतोपार्जनान्तं चरुवत्कृत्वा ब्राह्मणो-पवेशनाद्यनुज्ञानान्तं प्रागुक्तवद् वा परिषेकादिपरिषेकान्तमिहोक्तं कृत्वा पिण्डदाना-द्यञ्जलिदानान्तं करोति। पाकयज्ञपक्षे [८]प्राक् ब्राह्मणोपवेशनाद्यनुज्ञापनान्तं कृत्वा-ऽन्नस्येत्यादि पञ्चाहुतीर्हुत्वार्जनान्नमन्नस्विष्टकृतिवत् पिण्डदानाद्युदकाञ्जलि-दानान्तं[९] करोति[९]। अत्रान्नमांसवदित्यादि पञ्चहोममन्त्राः। अस्मिन्नहनि

---

१. गर्भागात्रनीस्वभाव इति. २. M Ad प्रतीयः. ३. M Ad °कृतिं. ४. M Ad give केचित् after कुर्वन्ति. ५. M Ad °अनिम°. ६. M Ad °सहानुमन्त्रिते°. ७. M Ad indicate the end of the 7th *Khaṇḍa* इति सप्तमः. ८. M Ad °पक्षैः. ९-९. M Ad °दानानि...यात्रम्नमांस°.

दक्षिणादानदर्शनानि त्रिष्वप्यहःसु त एव भोक्तारः। दक्षिणादानं चात्रैव, न पूर्वयोरह्नोर्दक्षिणादानकालः। भुक्तवत्सु तृतीयतिलोदकदानान्तरं तूष्णीम्। केचिन्मन्त्रलिङ्गादि यथाद्रव्यम्। 'आपो हि ष्ठा' (तैआ. ४.४२.२२) इति रहस्यपठितमन्त्रेणात्र सर्वत्र तिलोदकदानम्। 'शन्नो देवीः' (तैआ. ४.४२.१९) इति वा[1]। 'अमुष्मै स्वधा नमः' इति वा। 'पितरिदं तेऽर्घ्यम्', 'पितामहेदं तेऽर्घ्यम्', 'प्रपितामहेदं तेऽर्घ्यम्' इति वा। भुञ्जानेषु 'प्राणे निविश्यामितं जुहोमि', 'ब्रह्मणि आत्मामृतत्वाय' इति वा। 'प्राणे निविश्यामृतं जुहोमि शिवो मा विशाप्रदाहाय' इत्यादिना नारायणपठितान्वा जपेत्। नैव जप इत्यादि यामाभिप्रायं नारायणपाठपक्षे 'ब्रह्मणि मे' इत्यादि निरीक्षणमन्त्रः[2]॥ ५॥

॥ इति॥

इति चतुर्थाध्याये द्वादशः खण्डः[3]

समाप्तश्च चतुर्थोऽध्यायः

—o—

---

१. M Ad indicate the end of the 6th *Khaṇḍa* by the sign ,, — Ad does not show the sign of end. २. Due to displacement of folios the text dealing with दहनविधिप्रयोग अनुपेतोन्मत्तविधिः, मृतबलिहरम् एकोद्दिष्टविधिः, etc have wrongly been given hereafter in M (p.518) and Ad (p.1014, line 8) onward. ३. M Ad इति सप्तमः.

अथ पञ्चमाध्याये प्रथमः खण्डः

[1]अथाष्टकाकर्म

[2][अष्टकां करिष्यमाण उपकल्पयते उक्षाणं वा वेहतं व्रीहीनन्नं मधु च सर्पिश्च][2] फाल्गुनस्य। अथ यदि द्वे तैषस्य माघस्याथ यद्येकां[3] माघस्यैव॥ १॥

वृत्तिः—अष्टकां करिष्यमाणो भवति। गृहसं[4][स्कार]प्रसङ्गाद्धि जातिकर्मा भिहितम्॥

[प्रसिद्धं शौचम्॥ २॥][5]

वृत्तिः—स्नानादिस्मृत्युदितं शुचिना कर्तव्यमिति। सर्वकर्मणां शेष उच्यते। इह विशेषवचनमत्रा[6]...पि प्रसिद्धग्रहणादन्येषामपि स्मृतिशास्त्रोक्तानां पितृकार्य-शेषा[णाम्[7]...॥

[4][अनूराधायामग्निमुपसमाधाय परिस्तीर्यापरेणाग्निं व्रीहीनेक-पवित्रोऽथ निर्वपति— 'इममपूपं चतुःशरावं नि]र्वपामि[8] क्लेशावहं पितृणाꣳ संपराय[9]'। देवेन सवित्रा प्रसूता देवस्य त्वा [10](सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो)[10] हस्ताभ्यां पितृभ्यो वो[11] जुष्टं निर्वपामि' **इति॥ ३॥**

---

१. M[1] H[1] H[2] give the text of अष्टकाकर्म on p.1 with opening few lines broken. Its वृत्ति is found in M (p.549, line17) and Ad (p.1067, line 1) onward. The text dealing with अष्टका as found in *VādhGS*, has verbatim similarity with *ĀgniGS* at many places. So, in case of broken text in the former the text has been reconstruted in accordance with the latter. २-२. M[1] broken, cf *ĀgniGS* 3.2.1. ३. M[1] H[1] यद्यैकां. ४. M Ad broken. ५. M[1] H[1] broken, see *ĀgniGS* 3.2.1. ६. M Ad ०मत्या...पि. ७. M Ad broken. ८. M[1] H[1] broken. ९. M[1] H[1] पतामि. १०. M[1] संपरायै, H[1] ०पराय, cf ०पराये *ĀgniGS* 3.2.1, *HiGS* 2.14.3. ११-११. M[1] abri त्वा=हस्ताभ्यां. १२. M[1] H[1] cf *ĀgniGS* 3.2.1 तृभ्यस्त्वा.

वृत्तिः–[1][अप]रपक्षेऽस्य कर्मणो नित्यत्वात् तत्र च प्रायेणानूराधादिषु नक्षत्रेषु सप्तम्याद्यास्तिथयो भवन्ति इत्यनूराधा[2]... उपलक्षणार्थम्। परिस्तरणस्य दक्षिणाग्रता दक्षिणाप्रागग्रता वा [3][एक]पवित्रेण एकपवित्रे शूर्पे निर्वपति यथा पुरोडाशम्॥

अथैतान्[4] प्रोक्षति– 'पितृभ्यो वो जुष्टं प्रोक्षामि' **[इति][5]॥ ४॥**

[6][अथ तूष्णीं हविष्कृता वाचं विसृज्य यथा पुरोडाशमेवमेवैतमपूपं षट्कपालम् एककपालं वा][6] अभिघारयति[7]॥ ५॥

वृत्तिः–एवमेवेति वचनानि निर्वपण[वच][8]नाच्च मन्त्रप्राप्त्याशङ्का मा भूदिति तूष्णीं ग्रहणम्॥

[9]अथैनमुद्वासयति॥ ६॥

अथ परिषिञ्चति– 'अदितेऽनुमन्यस्व' **इति दक्षिणतः**; '[10]अनुमतेऽनुमन्यस्व' **इति पश्चात्**; 'सरस्वते[11]ऽनुमन्यस्व' **इत्युत्तरतः**; 'देव सवितः प्रसुव' **इति समन्ततः॥ ७॥**

वृत्तिः–एकमेव कपालं नाधिश्रयणावज्वल[12]नाभिवासनानि क्रियन्ते। पिण्डदानार्थमोदनमपि श्रपयन्ति। भोजनार्थं चान्नम्[13]। अथ पञ्च निर्वपणार्थमेव पवित्रमुदकात् [14]प[ञ्च...]पूजितान् प्राङ्मुखानुदङ्मुखान् दार्भेष्वासनेषूपविश्य[15] पवित्रं तिलोदकं दत्त्वाऽलंकारं दत्त्वा अनुज्ञाप्य परिषेकादि प्रतिपद्यते॥

तस्योत्तरस्मादपरस्मादन्तादवादयोत्तरस्मिन्नपरस्मिन्नपरेण– [16][**जुहोति**–'इयमेव सा या प्रथमा व्यौच्छ]दन्तरस्यां चरति प्रविष्टा। वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचन्ते स्वधा हव्यं स्वधा नमः[17] स्वाहा' **इति॥ ८॥**

---

१. M Ad ...रपेक्षे. २. M Ad °राधा...उपल°. ३. M Ad broken वा...पवि°. ४. M °नान्, H[1] °तान्. ५. M[1] H[1] broken. ६-६. broken, thus *ĀgniGS* 3.2.1. ७. Ad अधिश्रयति, cf *ĀgniGS* 3.2.1. ८. M Ad °पण...नाच्च. ९. M[1] H[1] अथमुद्वा°. १०. H[1] om अनुमते; thus M[1]. ११. H[1] °स्वतो°; thus M[1]. १२. M Ad °ज्वलाभिवा°. १३. M Ad चान्ना...थ. १४. M Ad प...सं°. १५. M wrongly shows the sign of broken text as °वेश्य...पवित्रं, not shown in Ad. १६. M[1] H[1] broken, thus ĀgniGS 3.2.2. १७. H[1] नमस्वेति; thus M[1].

दक्षिणपूर्वमवान्तरदेशमपूपस्य वर्षीयोऽ[1]वदायाग्नेस्तदिमामेव[2] दिशामाहुतीरभि सꣳस्थापयति॥ ९॥

[3]**अपूपं जुहोति**– [4]['अपूपं देव घृतवन्तमग्ने स्वधावन्तं पितृणां तर्पणा]य[4]। यथायथं वह हव्यानि देवान् पुत्रः[5] पितृभ्य आहुतिं जुहोमि स्वधा हव्यꣳ स्वधा नमः स्वाहा' **इति**; 'औलूखला ग्रावाणो घोषमक्रत[6] हविष्कृण्वन्तः[7] परिवत्सरीणम्। एकाष्टके सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणां स्व[8][धा हव्यꣳ स्वधा नमः स्वाहा'; 'यां जनाः प्रतिनन्दन्ति रा]त्रिं[8] धेनुमिवायतीम्। सँवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वधा हव्यꣳ स्वधा नमः स्वाहा'; 'एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम्। तेन दस्यून् व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः स्वधा हव्यꣳ स्वधा [9][नमः स्वाहा']९, 'प्रजापते[10] (न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो) रयीणाम्[10] स्वाहा[11] हव्यꣳ स्वधा नमः स्वाहा' **इति॥ १०॥**

दक्षिणपुरस्ताद्वर्षीयोऽवदाय[12] सौविष्टकृती[13]र्जुहोति– 'यदस्य [14](कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत् स्विष्टकृद् विद्यात् सर्वꣳ स्विष्ट्ꣳ सुहुतं करोतु मे)[14] अग्नये स्विष्टकृते सुहुतहुते सर्वहुते सर्वप्रायश्चित्तय[15] आहुतीनां कामानां समर्धयित्रे स्वधा हव्यꣳ स्वधा नमः स्वाहा' [16]**इति॥ ११॥**

दर्वी[16] प्रक्षाल्य[17] निदधाति॥ १२॥

वृत्तिः–उपस्तरणाभिघारणप्रत्यञ्जनं कर्तव्यम्। स्विष्टकृत्सकृदेवाभिघारणं न प्रत्यनक्ति।

अथ [18]परिषिञ्चति[18] 'अदितेऽन्वमꣳस्थाः' **इति दक्षिणतः**; 'अनुमतेऽ-

---

१. M[1] वर्षीयापदा०, H[1] ०योपदा०. २. M[1] ०दिमेव, H[1] ०दिममे०. ३. H[1] पूतं but corrected as पूपं. ४-४. M[1] H[1] broken जुहोति...दः. ५. M[1] H[1] पुत्रं. ६. H[1] ०कृता. M[1] कृता. ७. M[1] H[1] कृ...व. ८-८. M[1] H[1] broken स्व...ति. ९-९. M[1] broken स्वधा...ति; thus H[1] H[2]. १०-१०. M[1] दक्षिणां, H[1] प्रजापते=रक्षीणँ H[2] प्रजापते=रक्षीणꣳ...स्वाहा. ११. M[1] H[1] om स्व...पा, H[2] ०क्षिणां...स्वाहा. १२. M[1] H[1] ०योपदाय; thus H[2]. १३. M[1] H[1] ०कृतीञ्जु, H[2] ०कृतीर्जु. १४-१४. M[1] H[1] H[2] Text abri यदस्य=अग्नये. १५. H[2] ०श्चित्त आ०. १६-१६. H[2] स्वधा...र्वीं, M[1] H[1] स्वाहेति...दर्वी. १७. H[2] ०ल्य स्वधा निद०; thus M[1] H[2]. १८-१८. H[2] om; thus M[1] H[2].

न्वमꣳस्था:' **इति पश्चात्;** 'सरस्वतेऽन्वमꣳस्था:' **इत्युत्तरत:;** 'देव सवित: प्रासावी:' **इति समन्तत:**[१] **पिण्डानाम् ॥ १३॥**

[२]**आवृत्यौदनस्य पिण्डान् ददाति**[३]**॥ १४॥**

वृत्ति:– पिण्डानामावृतोदनस्य पिण्डं ददाति[४]॥

अथैतमपूपमन्न[५]**मभिमृशति–**'पृथिवी समा तस्या अग्निरुपद्रष्टा दत्तस्याप्रममाय[६]'; 'पृथिवी ते पात्रं [७]द्यौरपिधानं[७] ब्रह्मणस्त्वा मुखे जुहोमि'; 'ब्राह्मणानां[८] त्वा (विद्यावतां)[९] प्राणापानयोर्जुहोम्यक्षितमसि [१०]मा मां[१०] क्षेष्ठा: पित्रे[११]ऽमुत्रामुष्मिन् लोके'। 'अन्तरिक्षꣳ समं तस्य वायुरुपद्रष्टा[१२](दत्तस्याप्रममाय; पृथिवी ते पात्रं द्यौरपिधानं)[१२] ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां = मा मे क्षेष्ठा: पितामहायामुत्रामुष्मिन् लोके'। 'द्यौ: समा तस्या[१३] आदित्य उपद्रष्टा दत्तस्याप्रममाय[१४], पृथिवी ते पात्रं = क्षेष्ठा [१५]प्रपितामहायामुत्रामुष्मिन् लोके' **इति॥ १५॥**

अथैतेनापूपेनान्नवता धृतव्रताय[१६] **दद्यात्। यद्यु वाऽन्नं न स्यादपूपेनैव परिविषेत्**[१७]**। परिविष्योदकाय गत्वोदकाञ्जलिदानेनोदकाञ्जलिं ददाति–** 'एष ते तत मधुमाँ ऊर्मि: सरस्वान् यावानग्निश्च पृथिवी च तावत्यस्य मात्रा [१८]तावानस्य (महिमा)[१९] तावन्तमेनं भूतं नयामि यथाऽग्निरक्षितोऽनुपदस्त[२०] एवं मह्यं[२१] [ताय पित्रेऽक्षितोऽनुपदस्त: स्वधा भवतां त्वं स्वधामक्षितं तै: सहोप][२२]जीवर्चस्ते महिमा'; 'एष ते पितामह मधुमाँ ऊर्मि: सरस्वान् यावान् वायुश्चान्तरिक्षं च तावत्यस्य मात्रा (तावानस्य महिमा)[२३] तावन्तमेनं भूतं नयामि

---

१. M[1] H[1] H[2] समन्तं. २. M[1] H[1] ०वृतोदन०, H[2] ०वृतौदन०. ३. H[1] दद्या०; thus M[1] H[2]. ४. M Ad दद्यते. ५. H[2] ०मह्म...ममिभ०; thus M[1] H[1]. ६. cf *ĀgniGS* 3.2.3 प्रमादा; thus M[1] H[1] H[2]. ७-७. H[2] om. ८. M[1] H[1] H[2] om; thus *ĀgniGS*. ९. M[1] H[1] om; thus H[2]. १०-१०. H[2] मैवा; thus M[1] H[1]. ११. H[2] om; thus M[1] H[1]. १२-१२. M[1] abri द्रष्टा=ब्रह्मणस्त्वा, H[2] द्रष्टाम=. १३. H[1] तस्यादित्य, but corrected as तस्या आ०; thus M[1] H[2]. १४. M[1] H[1] H[2] ०प्रममाय. १५. M[1] H[1] om; H[2] (प्र)पिता०. १६. M[1] H[1] H[2] घृतवता...य. १७. H[2] ०षत्, M[1] H[1] ०वेषेत. १८. M[1] H[1] तावतीं, H[2] om. १९. M[1] H[1] H[2] om. २०. H[2] ०स्थ. २१. H[2] मे... २२. M[1] मह्यं...जीवर्च, H[2] हौच जीव०. २३. M[1] H[1] H[2] om.

यथा वायुरक्षितोऽनुपदस्त[१] एवं मे पितामहाय पित्रेऽक्षितोऽनुपदस्तः स्वधा = [२]सहोप जीव यजूꣳषि ते महिमा'; [३]('एष ते प्रपितामह मधुमाँ ऊर्मिः सरस्वान् यावानादित्यश्च)[३] द्यौश्च तावत्यस्य मात्रा (तावानस्य महिमा)[४] तावन्तमेनं भूतं नयामि यथाऽऽदित्योऽक्षितोऽनुपदस्त[५] एवं मे प्रपितामहाय [पित्रेऽ][६] क्षितोऽनुपदस्त स्वधा भवतां = सहोपजीव सामानि ते महिमा' **इति। एतावदेवैतदहःकर्म भवति॥ १६॥**

अनूराधा ह वै मैत्रं [७]नक्षत्रꣳस्तेनैव पितॄनतर्पयन्। त एनाꣳस्तृप्ताः[८] प्रजया पशुभिरतर्पयन्। अथो पितृभिर्मित्रमकुरुत। मित्रं हैवास्य सर्वाणि भूतान्यभवन्। स य एवं विद्वानेतमाष्टक्यामपूपं चतुःशरावं निर्वपति तेनैव पितृꣳस्तर्पयति। त एनं तृप्ताः [९][प्रजया पशुभिस्तर्पयन्ति। मित्रं हैवास्य सर्वाणि भूतानि भवन्ति॥ १७॥

[शूलगवः]

श्वो ज्येष्ठायामग्निमुपसमा][१]धाय शोभयित्वा बर्हिषा परिस्तीर्याज्यं विलाप्योत्पूय पर्यग्निकृत्वा परिषिच्योपाकरणीयां जुहोति– 'इमां पितृभ्यो जुष्टामुपाकरोम्यूर्जस्वतीꣳ स्वधावतीम्[१०]। ०तां मे जुषन्तां पितरः समेताः सा मे पितॄन् संपराये धिनोतु स्वधा हव्यं [११][स्वधा नमः स्वाहा' **इति॥ १८॥**

इमां][११] 'पितृभ्यस्त्वा जुष्टामुपाकरोमि' **इति॥ १९॥**

अथैनां प्रोक्षति– 'पितृभ्यस्त्वा[१२] जुष्टां प्रोक्षामि' **इति॥ २०॥**

तां दक्षिणेनाग्निं प्रतीचीनशिरसीं[१३] दक्षिणापदीं[१४] संज्ञपयन्ति। [१५]तस्यै संज्ञप्ताया अद्भिरभिषेकम्। प्राणानाप्याययन्ति। तूष्णीमेव [१६][एता]न्युद्धरन्ति हृदयं जिह्वां वक्ष[१७]स्तनिममतस्ने। तान्येतस्मिन्नग्नावौदुम्बरैः शूलैः प्रणीक्ष्य

---

१. H^2 ०स्थः. २. M^1 H^1 H^2 होप. ३-३. M^1 H^1 H^2 महिमै...द्यौ०, M^1 M^1 H^2 महिमै...ताव०. ४. M^1 H^1 H^2 om. ५. H^2 om after स्थ upto स्वधा०; thus M^1 H^2. ६. M^1 om. ७. M^1 H^1 H^2 ०क्षत्र...स्तेनैव. ८. H^1 तृप्त्वा. ९-९. M^1 H^1 H^2 broken: तृप्ता...धाय. १०. H^2 ०विनीं. ११-११. M^1 H^1 H^2 broken. १२. M^1 H^1 त्वा वो, H^2 त्वा जुष्टा. १३. M^1 H^1 शिरसि०; thus H^2, cf ०शिरसिं *ĀgniGS* 3.2.5. १४. H^2 ०णावतीं. १५. M^1 H^1 H^2 repeats तस्यै संज्ञपयन्ति. १६. M^1 H^1 तूष्णीं मे व...न्युद्ध०, H^2 ०ष्णीं...रन्ति. १७. M^1 H^1 जिह्वापेक्षं०.

श्रपयन्ति। शृतेषु[१] त्रेधा वपां विच्छिद्यौदुम्बर्या दर्व्योपस्तीर्णाभिघारितां जुहोति सकृद्[२]– 'वह वपां जातवेदः[३] पितृभ्यो यत्रै[४] [नान्वेत्थ निहितान्पराके। मेदसः कुल्या उप तान्] [४]क्षरन्तु तीव्रा एषामाशिषः सन्तु कामैः स्वधा हव्यꣳ स्वधा नमः स्वाहा' **इति॥ २१॥**

अथैतेषामवदानानाम[५]न्नस्य समवदाय[६] जुहोति– 'इयमेव सा[७] या[७] प्रथमा व्यौच्छद्०[८]'; 'एकाष्टका तपसा तप्यमाना जजान गर्भम्; एकाष्टकां पश्यतु[९] दोहमान[मन्नं माꣳसवद् घृतवत् स्वधावत्। तद्ब्राह्मणैरति][१०]पूतꣳ= [११]स्फीतमनन्तं गच्छतु मे पितृभ्यः स्वधा हव्यꣳ स्वधा नमः स्वाहा'; 'एकाष्टका तपसा तप्यमाना संवत्सरस्य पत्नी दुदुहे प्रपीना। तं दोहमुपजीवाथ पितरः परस्तात् सहस्रधा दह्यमानाꣳ स्वधा हव्यꣳ स्वधा नमः स्वाहा'; 'संव[१२][त्सरस्य प्रतिमां यां त्वा रात्र्युपासते प्रजाꣳ सु]वीरां[१२] कृत्वा विश्वमायुर्व्यश्नवत् स्वधा हव्यꣳ स्वधा नमः स्वाहा' **इति॥ २२॥**

